In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत अकाडमी ग्रन्थमाला - 95

रामचन्द्रकविप्रणीतम्

वाग्भूषणम्

चित्राख्यया व्याख्यया संवलितम्

प्रधानसम्पादकः
डा. वि. श्रीनिवासशर्मा
निदेशकः

सम्पादकः
डा. जोषी सन्तोष् कुमारः
शोधसहायकः

संस्कृत अकाडमी
राष्ट्रियसंस्कृतसंस्थानेन मानिता आदर्शशोधसंस्था
उस्मानियाविश्वविद्यालयः
हैदराबाद्
2013

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत अकाडमी ग्रन्थमाला -95

रामचन्द्रकविप्रणीतम्

वाग्भूषणम्

चित्राख्यया व्याख्यया संवलितम्

प्रधानसम्पादकः

डा वि.श्रीनिवासशर्मा

निदेशकः

सम्पादकः

डा जोषी. सन्तोष् कुमारः

शोधसहायकः

संस्कृत अकाडमी

(आदर्शशोधसंस्था नवदेहलीस्थराष्ट्रियसंस्कृतसंस्थानेन मानिता)

उस्मानिया विश्वविद्यालयः, हैदराबाद्

2013

In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत अकाडमी ग्रन्थमाला -95
ISBN – 978-93-80171-30-2

रामचन्द्रकविप्रणीतम्

वाग्भूषणम्

चित्राख्यया व्याख्यया संवलितम्

ग्रन्थोऽयं भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनस्य राष्ट्रियसंस्कृतसंस्थानस्य मानितविश्वविद्यालयस्य द्रव्यानुदानेन प्रकाशितः

प्रथममुद्रणम्-2013

प्रतयः - 300

मूल्यम् - 75 रूप्यकाणि

सर्वेऽधिकाराः संस्कृतपरिषदायत्ताः

प्राप्तिस्थानम्-
संस्कृतपरिषद्
(आदर्शशोधसंस्था)
उस्मानिया विश्वविद्यालयः, हैदराबाद् -500007,
दूरवाणी-040-27070281

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Series-95

VAGBHUSHANAM
OF
RAMACHANDRAKAVI

ENDOWED WITH THE COMMENTARY "CHITRA"

Chief Editor
Dr V. Srinivasa Sharma
In charge Director

Editor
Dr Joshi. Santosh kumar
Research Assistant

SANSKRIT ACADEMY
(Adarsha Shodha samstha)
Recognised by Rashtriya Sanskrit Sansthan, Newdelhi
Osmania University, Hyderabad-07
2013

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Series-95

ISBN – 978-93-80171-30-2

VAGBHUSHANAM OF RAMACHANDRAKAVI

WITH THE COMMENTARY OF CHITRA

This Book is brought out by the Generous Financial help of Rastriya SANSKRIT SANSTHAN, NEW Delhi

First Edition-2013

Copies – 300

Price - Rs.75/.

Printed at- Karshak Art Printers, Hyderabad

Copies can be had from-

SANSKRIT ACADEMY

(Adarsha Shodha samstha)

Osmania University, Hyderabad-07

Phone&Fax 040-27070281

Website – www.Osmania.ac.in/sanskritacademy

In Public domain. Digitization Muthulakshmi Research Academy

VAGBHUSHANAM

The literature of a civilization is a much finer indication of a culture. Literature is the index of the mind of a nation. India has preserved her highly evolved civilization in architecture of ornamental writing sculpted in the euphonious language of Sanskrit. From the undated antiquity, the noblest of scriptures have first emerged. The popularity of Sanskrit literature down the centuries has been unsurpassed. It contains all aspects of human life i.e., code of life; a philosophy of social and ethical relations, and speculative thought on human problems which is tough to rival. Above all these, the grandest of sagas in the fabulous Sanskrit literature take the readers to the height of literary wonders.

One of such fabulous works in Sanskrit is 'Vagbhushanam' authored by Shri Ramachandra Kavi. This poet of excellence hails from Pandyadesha located on the banks of river Tamraparni, in Tamil Nadu. The Poet has with utmost care woven the Vagbhushanam in 102 verses along with the commentaory which enables the readers to understand the true import of the verses – i.e. Kavi hrudaya.

Vagbhushanam covers the aspects of Navagrahas, Dashavataras, Dashadikpalakas, Trimurtis, Trishaktis and the four Purusharthas.

Every verse in the Vagbhushanam is a precious pearl which on steady recitation can ward off the in auspicious and eveil influences.

In Public domain..Digitization Muthulakshmi Research Academy

It is very important that the knowledge of Ekakshara kosha is very essential to understand the true import of many verses in the Vagbhushanam.

I am extremely thankful to Prof. S. Satyanarayana, Hon'ble Vice-Chancellor,OsmaniaUniversity,

Prof.Radhavallabh Tripathi, Hon'ble Vice-Chancellor, Rashtriya Sanskrit Sansthan, New Delhi, Prof. K. Subbarayudu, Registrar, Rashtriya Sanskrit Sansthan, New Delhi and the officials of Osmania University, Hyderabad and Rashtriya Sanskrit Sansthan, New Delhi.

It is my pleasure to thank Dr. J. Santosh Kumar for his contribution to edit this great work.

Dr V.Srinivasa Sharma

In charge Director

In Public domain. Digitization Muthulakshmi Research Academy

|| श्रीः ||

वाग्भूषणवैचित्र्यम्

विप्राधिपारिरिपुसूनुविरोधितातो
मित्रात्मजारिजनकारिसुताङ्कसंस्थः।
पार्थाग्रजाग्र्य जनकाशन शत्रुपत्र
ज्येष्ठो ददातु कुचुमध्यमुखः शुभं वः ॥

गूढपदमतिप्रदं वाग्भूषणं काव्यं श्रीमद्भिः विद्वद्वरेण्यैः श्री रामचन्द्र – कविवर्यैः विरचितम्। काव्येऽस्मिन् द्व्युत्तरशतसंख्याकाः श्लोकाः सन्ति। द्व्युत्तरशततमश्श्लोकस्तु कवेरस्य शिष्योक्तिः। अनया उक्त्या रामचन्द्रकविः ताम्रपर्णीनदीतीरस्थदक्षिणप्रान्तपाण्ड्यदेशीयः इति ज्ञायते–

पाण्ड्ये पण्डितमण्डिते मलयजा श्रीताम्रपर्णी जलैः
पूते नीवृतिसम्भवेन गुरुणा श्रीरामचन्द्रेण नः ।
इत्थं गूढपदं मतिप्रदमहो वाग्भूषणाख्यं कृतं
काव्यं व्याक्रियतेऽत्र येन विदुषा तं तं नमामो वयम् ।। वाग्भूषणम् 102

"काव्यस्य वाग्भूषणसंज्ञकस्य गूढाक्षरस्य स्वकृतस्यास्य चित्रां व्याख्यां प्रचक्रे शतकस्य सूरिर्विद्वन्मुदे भार्गवरामचन्द्रः" इति श्लोकस्यास्य कवेरस्य चित्राख्यया व्याख्यया कविरयं भार्गवगोत्रवंशोत्पन्न इति वक्तुं शक्यते । एम् कृष्णमाचार्यमहोदयेनापि स्वीय साहित्यचरित्रे भार्गवरामचन्द्र इति प्रस्तावितम्।

पृष्ठसंख्या (378)

In Public domain. Digitization Muthulakshmi Research Academy

गूढाक्षरभूयिष्ठं काव्यमिदं व्याख्यानेनैव स्फुटबोधकं भवतीति विचिन्त्य कविरसौ पाठकानां सुखबोधाय सुन्दरं सुरुचिरं प्रासाक्षरभूयिष्ठं गूढपदार्थबोधकं व्याख्यानं चक्रे ।

ग्रन्थप्रकाशनस्याधारः

अस्मत् संस्कृतपरिषदि विद्यमान लिखितप्रतिं परिष्कृत्य वाग्भूषणकाव्यस्यास्य प्रकाशनं अनया संस्थयैव क्रियते ।

आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मतम् इत्यनेन प्रमाणेन काव्यारम्भः आशीर्भिर्वा देवतावन्दनेन वा काव्यवस्तुनिर्देशेन वा कुर्यादिति आलङ्कारिकानां मतम् । अमुं सनातनसम्प्रदायमनुसृत्य सर्वैः कविभिः स्व स्व कृतयः मङ्गलवाक्यैरेवारभ्यन्ते। परम् अत्र काव्ये सर्वत्र कविना मङ्गलमेव विहितम्। सर्वमङ्गलमयस्वरूपस्य भगवतः तथा च महापुरुषवर्णनमेवात्र प्रधानवस्तु । तेषां वन्दनं विधाय ते युष्मभ्यं मङ्गलं प्रयच्छन्तु,अथवा ते युष्मान् रक्षन्तु इत्यादिरीत्या वक्ति कविरयं रामचन्द्रः प्रत्येकस्मिन् श्लोके ।

काव्यविषयः

काव्येऽस्मिन् विषयसमालोचनं इत्थं दरीदृश्यते –

गणपतिप्रार्थना–1,नवग्रहाः–2–9,दशावताराः–10–19,त्रिमूर्तयः–20–22,त्रिशक्तयः–23–25,दशदिक्पालकाः–26–35, स्कन्दः–36,हेरम्बः–37,भैरवः–38, अश्विनीकुमारौ–39,हरिः–40, वामनः–41वराहः–42 गायत्री–43,लक्ष्मीः–44,पार्वतीपरमेश्वरौ–45,चण्डिका–46गङ्गा–47 कामधेनुः–48 ईश्वरवाहाः–49–51सत्त्यः–52–54 गुरुः–55 ब्राह्मणाः–

In Public domain. Digitization Muthulakshmi Research Academy

56-59कामः(तृतीयपुरुषार्थः)-60-66धर्मः-(प्रथमपुरुषार्थः)-67-79
अर्थः(द्वितीयपुरुषार्थः)-80-88,मोक्षः(तुरीयपुरुषार्थः)89-101
कविवृत्तान्तम्- 102

कवेः प्रतिभा

काव्येस्मिन् कविना नवीनानि गूढार्थप्रबोधकानि पदानि प्रयुक्तानि। व्याख्यानेनैव तेषाम् अर्थोऽवगम्यते । व्याख्यानचक्रवर्ति मल्लिनाथ इव रामचन्द्रकविः एकं विशिष्टं पदम् उपयुज्य तस्य कोशप्रमाणं प्रादर्शयत् । नवमे श्लोके **आच्छादयत्यविरतं जगदीश्वरस्य नेत्रेऽपि विक्कवपुषामिषतां सुराणां** इत्यादि श्लोके राहकेत्वोर्वर्णने विक्क इति शब्दस्य व्याख्यानं कुर्वन् विंशतिवत्सरवयस्कः गजः विक्क इत्युच्यते, "विक्को विंशति वत्सर" इति वैजयन्तीकोशस्य प्रमाणं अदर्शयत् ।

एवं विशिष्टपदानां शब्दव्युत्पत्तिः सम्यक् प्रादर्शयत् । केचन यथा-

- पत्रं (पक्षी) वाहनं यस्य सः- स्कन्दः 1
- गोजनिः- सूर्यः 2
- गौः पत्रं -वाहनं यस्य सः गोपत्रः- शिवः2
- गोपान् त्रायत इति गोपत्रः -कृष्णः2
- गोः वाण्याः पतिः गोपतिः-ब्रह्मा2
- गोः स्वर्गस्य इन्द्रः गवेन्द्रः- शक्रः 2
- गवां दिशां ईश्वराः गवीश्वराः – दिक्पालकाः2

In Public domain. Digitization Muthulakshmi Research Academy

- सूनानि पुष्पाण्यस्त्राणि यस्य सः सूनास्त्रः– कामः3
- आवनेयः अवनेः पुत्रः –भौमः4
- स्तम्बेरमासुरः– गजासुरः7
- इनस्यापत्यं पुमान् ऐनिः– शनैश्चरः 8
- आपवः–वसिष्ठः–10

एवं कवेरस्य असाधारण व्यकरणशास्त्रपाण्डित्यस्य पद्यमिदं उदाहरणम्–

जेजेति या सर्वसतीषु गौर्याः सख्यात्मभूसुततपः परिपाकसिद्धिः ।

देदेत्युमेवमहसोपयमेवदृष्टा ततन्ति शं प्रदयतां कमरुन्धती वः ॥{52}

श्लोकेस्मिन् जेजेति, देदेति ततन्ति इत्यादि यङ्लुगन्तप्रयोगाः द्रष्टुं शक्यन्ते ईदृशाः रमणीयप्रयोगाः काव्ये बहुत्र विद्यन्ते ।

कविनानेन व्याख्याने प्रमाणत्वेनोदाहृताः ग्रन्थाः –

श्रुतयः, श्रीमद्भागवतम्, अमरकोशः, विश्वकोशः, वैजयन्तीकोशः, सारावली, नाट्यशास्त्रम्, महाभारतम्, पद्मपुराणम्, स्कन्दपुराणम्, विष्णुधर्मोत्तरपुराणम्, हरिवंशपुराणम् इत्यादयः ।

मङ्गलश्लोकाः साहित्ये बहुभिः कविभिः स्व स्व ग्रन्थारम्भे विरचिताः दृश्यन्ते । परम् अत्र रामचन्द्रकविः केवलं मुक्तैः मङ्गलमयश्लोकैः देवतासम्बद्धैरेव एकं काव्यं प्रणिनाय। नानृषिः कुरुते काव्यं इत्युक्त्या

In Public domain. Digitization Muthulakshmi Research Academy

ऋष्यंशेनैव कविर्भवितुमर्हति तेन कविना प्रयुक्तानि वाक्यानि अमोघानि सत्यानि सफलानि भवन्तीति कथने न कापि संशीतिः ।

काव्यमिदं सहृदयपाठकानाम् आनन्दं मङ्गलं च दिश्यात् ।

यः सुध्युपास्योऽवतु मध्वरिर्हरि-
र्धात्रंशभूतो भवतोऽथ लाकृतिः।
क्रय्यस्तदर्थैर्भजनेन किल्बिषं
क्षय्यस्तु जय्यो भजतामरींश्च

भवदीयः

जोषि सन्तोष् कुमारः

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

विषयानुक्रमणिका

विषयः	श्लोकसंख्या
गणपतिप्रार्थना –	1
नवग्रहाः –	2–9
दशावताराः –	10–19
त्रिमूर्तयः –	20–22
त्रिशक्तयः –	23–25
दशदिक्पालकाः –	26–35
स्कन्दः –	36
हेरम्बः –	37
भैरवः –	38
अश्विनीकुमारौ –	39
हरिः –	40
वामनः –	41
वराहः –	42
गायत्री –	43
लक्ष्मीः –	44
पार्वतीपरमेश्वरौ –	45
चण्डिका –	46

In Public domain. Digitization Muthulakshmi Research Academy

गङ्गा–	47
कामधेनुः –	48
ईश्वरवाहाः –	49–51
सत्त्यः –	52–54
गुरुः –	55
ब्राह्मणाः –	56–59
कामः(तृतीयपुरुषार्थः)–	60–66
धर्मः–(प्रथमपुरुषार्थः) –	67–79
अर्थः(द्वितीयपुरुषार्थः)–	80–88
मोक्षः–(तुरीयपुरुषार्थः)	89–101
कविवृत्तान्तम्	102

In Public domain. Digitization Muthulakshmi Research Academy

गणपतिप्रार्थना

विप्राधिपारिरिपुसूनुविरोधितातो
मित्रात्मजारिजनकारिसुताङ्कसंस्थः।
पार्थाग्रजाग्र्य जनकाशन शत्रुपत्र
ज्येष्ठो ददातु कुचुमध्यमुखः शुभं वः ।। {1}

भवभयहरमेकं भानुकोटिप्रकाशं
करधृतशरचापं कालमेघावभासं।
कनकरुचिरवस्त्रं रत्नवत्कुण्डलाढ्यं
कमलविशदनेत्रं सानुजं राममीडे ।।

नत्वा गुरुं राममभीष्टदेवं भक्तस्तयोः स्वेन कृतस्य तन्वीम् ।
काव्यस्य वाग्भूषणसंज्ञकस्य व्याख्यां करोति स्म स रामचन्द्रः।।

।। विप्रेति ।। विप्राधिपश्चन्द्रस्तस्यारिः राहुस्तस्य रिपुः कृष्णस्तस्य सूनुः कामस्तं विरोद्धुं शीलं यस्य स शिवस्तस्य तातः पुत्रः "तातस्तु पितृ-पुत्रयोरिति" केशवः मित्रः सूर्यस्तस्यात्मजः कर्णस्तदरिरर्जुनस्तस्य जनकः इन्द्रः स अरिर्यस्य सः पर्वतस्तस्य पर्वतस्य सुता पार्वती तस्या अङ्के उत्सङ्गे च स्थितः पार्थोऽर्जुनस्तस्याग्रजो भीमसेनस्तस्याग्र्यजनकः श्रेष्ठपिता वायुरशनं येषां ते सर्प्पास्तेषां शत्रुर्मयूरः सः पत्रं वाहनं यस्य सः स्कन्दः "पत्रं वाहनपक्षयोरित्यमरः"तस्य ज्येष्ठः कुचुमध्यमुखः कुच्वोः कवर्गचवर्गयोर्मध्यस्य मुखं यस्य सः गज़मुख इत्यर्थः वो युष्माकं शुभं ददातु ।

In Public domain. Digitization Muthulakshmi Research Academy

अथ नव ग्रहाः

सूर्यः

गौर्गोजनिर्गवि गवां स्वगवाचितानां
वृष्ट्याऽभिनन्दयति यो जनताः स्वगोदः।
गोपत्रगोपतिगवेन्द्रगवीश्वराणां
पूज्यो गवां सभुगसौ ददतां श्रियं वः।। {2}

।। गौरिति ।। गवां धेनूनां जनिरुद्भवो यस्मादिति गोजनिः सूर्यः सूर्यसुता वै गाव इति श्रुतेः स्वगोभिः स्वकिरणैराचितानां गवां जलानां वृष्ट्या गवि भूमौ जनताः जनसमूहान् यो गौः सूर्यः अभिनन्दयति स्वगां दृष्टिं ददातीति स्वगोदः, दृष्टेः सूर्याश्रयत्वात्तदुदये तच्छक्तिर्भवति, गौः पत्रं वाहनं यस्य सः गोपत्रः शिवः, गोपान् त्रायत इति गोपत्रः कृष्णश्च, गोः वाण्याः पतिः गोपतिर्ब्रह्मा, गोः स्वर्गस्येन्द्रः गवेन्द्रः शक्रः गवां दिशामीश्वराः गवीश्वराः दिक्पालास्तेषां पूज्यः, गवां क्रतूनां भुक् भोक्ताऽसौ गौः सूर्यः वः श्रियं ददतां ददातु । गौर्नादित्ये बलीवर्दे क्रतुभेदर्षिभेदयोः । स्त्री तु स्याद्दिशि भारत्यां भूमौ च सुरभावपि पुंस्त्रियोः स्वर्गवज्राम्बुरश्मि दृग्बाणलोमस्विति केशवः।

चन्द्रः

सूनास्त्रमित्रसदृशाभिधहन्तृशक्ते-
र्भ्राता प्रतीकमहदस्त्रममोघमब्जः।
सर्वं सहाधरसुतापतिमूर्ध्नि संस्थो
दृग्व्यापकस्य भवतां प्रमुदेऽस्तु नित्यम् ।। {3}

Public domain. Digitization Muthulakshmi Research Academy

।। सूनेति ।। सूनानि पुष्पाण्यस्त्राणि यस्य सः सूनास्त्रः कामस्तस्य मित्रं मधुर्वसन्तस्तस्य सदृशाभिधः नाम्ना सदृशः मधुदैत्यस्तस्य हन्ता विष्णुस्तस्य शक्तेः लक्ष्म्याः भ्राता अमोघमकुण्ठितमप्रतीकस्यानङ्गस्य महदस्त्रं सर्वं सहाधरो भूधरस्तत्सुता पार्वती, तत्पतिः शिवस्तस्य मूर्ध्नि संस्थः स्थितः व्यापकस्य विष्णोः दृक्नेत्रमब्जश्चन्द्रः भवतां प्रमुदे हर्षाय नित्यमस्तु ।

भौमः

यश्शम्भुबाणसदनाम्बरवेष्टिताङ्गा
पीनस्तनप्रसृतदुग्धधयः प्रपुष्टः।
राज्ये स्थितश्च भविनां प्रददाति राज्यं
युष्माकमादिशतु मङ्गलमावनेयः।। {4}

।। य इति।। शम्भोर्बाणः विष्णुः त्रिपुरवधे शिवस्य विष्णुर्बाणो जात इत्यागमः तस्य सदनं गृहं समुद्रः स एवाम्बरं वस्त्रं तेन वेष्टितान्यङ्गानि यस्याः सा शम्भुबाणसदनाम्बरवेष्टिताङ्गा भूमिस्तस्याः पीनस्तनाभ्यां प्रसृतं यद्दुग्धं तस्य धयः पानं तेन प्रपुष्टः राज्ये लग्नाद्दशमे स्थितश्च यो भौमः भविनां संसारिणां राज्यं प्रददाति स आवनेयः अवनेः पुत्रः भौमः युष्माकं मङ्गलमादिशतु ददातु ।

बुधः

कंसारिवामनयनात्प्रतिपन्नजन्मा
पुत्रं तमैलमतिकाममजीजनद्यः।

In Public domain. Digitization Muthulakshmi Research Academy

यंसोर्वशी प्रचकमे द्युसदो विहाय

बुद्धिं सुखस्थ इव वः स ददातु सौम्यः।। {5}

।।कंसेति।। कंसारेर्विष्णोर्वामनयनात् चन्द्रादित्यर्थः, प्रतिपन्नं प्राप्तं जन्म येन सः यःसौम्यस्तमैलमतिकाममतिसुन्दरमित्यर्थः,पुरूरवसं पुत्रमजीजनत् जनयामास तं कं सा प्रसिन्धोर्वशी द्युसदो देवान्विहाय यमैलं राजानं प्रचकमे कामयामास स सौम्यो बुधः सुखस्थः लग्नाच्चतुर्थगत इव वो युष्मभ्यं बुद्धिं ददातु चतुर्थगतो बुधो बुद्धिं ददातीति ज्योतिर्विदः।।

बृहस्पतिः

गायत्रिवत्समृदुविष्टरभूतजिह्वो

लेखारिमर्दनसमर्थमहामनूग्रः।

चार्वाकशास्त्रपरिदूषितवेदशास्त्रः

सम्मोहयन्दितिसुतान्धिषणोऽवताद्वः।। {6}

।। गायत्रीति।। गायत्र्याः वत्साः वेदास्तेषां मृद्वीविष्टरभूता आसनभूता जिह्वा यस्य सः तैस्तत्रैव कृतास्पदत्वात् लेखानां देवानामरयः असुरास्तेषां मर्दने समर्थैर्महामनुभिर्महामन्त्रैरुग्रः चार्वाकशास्त्रेण परिदूषितानि वेदशास्त्राणि येन सः दितिसुतान्दैत्यान् सम्मोहयन् धिषणो बृहस्पतिर्वो युष्मानवताद्रक्षतु बृहस्पतिना दैत्यसम्मोहनार्थं वेदशास्त्रविरुद्धं चार्वाकशास्त्रं कृतमिति पुराणेषु प्रसिद्धिः।

शुक्रः स्तम्बेरमासुररिपोरधिगम्य विद्यां

सञ्जीविनीं कविकविः शुशुभे द्युमध्ये।

रामचन्द्रकविः In Public domain. Digitization Muthulakshmi Research Academy

यस्मिन् गवा सहयुते भुवि मङ्गलं न
स्वश्श्रेयसं तदुदितः स ददातु काव्यः।। {7}

।।स्तम्बेति।। कवीनां कविः कविकविर्यः काव्यः स्तम्बेरमासुरो गजासुरस्तस्य रिपोः शिवात् सञ्जीविनीं विद्यामधिगम्य प्राप्य द्युमध्ये शुशुभे शोभते स्म । यस्मिन्काव्ये गवा सूर्येण सहयुते अस्तङ्गत इत्यर्थः, भुवि मङ्गलं न भवति तस्मादुदितः उदयं प्राप्तः स काव्यः शुक्रः स्वश्श्रेयसं कल्याणं ददातु व इति विशेषः।

शनिः

पौलस्त्यशत्रुजनकाय वरप्रदाता
यः क्रूरदृष्टिविनिपातितदेवदैत्यः।
क्रूरोऽपि जूकतनुगः कुरुते महीपं
युष्माकमैनिरहह द्यतु सङ्कटं सः।। {8}

।।पौलस्त्येति।। पौलस्त्यो रावणस्तस्य शत्रुः रामस्तस्य जनकाय दशरथाय वरप्रदाता क्रूरया दृष्ट्या विनिपातिताः देवाः दैत्याश्रयेन सः क्रूरोऽपि य ऐनिः जूकतनुगः तुलालग्नगतःसन् महीपं राजानं कुरुते, स ऐनिः इनस्यापत्यं पुमानैनिः शनैश्चरः युष्माकं सङ्कटं द्यतु खण्डयतु दूरीकरोतु अंहहेति हर्षे ।

राहुः, केतुः

आच्छादयत्यविरतं जगदीश्वरस्य
नेत्रेऽपि विक्कवपुषा मिषतां सुराणाम् ।
सोमं पपौ विधुविधी अपि यः प्रतार्य

In Public domain. Digitization Muthulakshmi Research Academy

दिश्यात्स राहुरनिशं भवतां सकेतुः।। {9} इति नवग्रहाः

।।आच्छादयतीति।। यो राहुर्मिषतां पश्यतां सुराणां देवानां पश्यतो देवाननादृत्येत्यर्थः षष्ठी चानादरेत्यनादराधिक्ये षष्ठी विक्कवपुषा गजशरीरेण विंशतिवत्सरो गजो विक्क इत्युच्यते "विक्को विंशतिवत्सर इति वैजयन्ती"। जगदीश्वरस्य विष्णोरपि नेत्रे सूर्याचन्द्रमसावित्यर्थः अविरतमनवच्छिन्न-माच्छादयति ग्रसतीति भावः, "राहुर्वै हस्ती भूत्वा चन्द्रमसं ग्रसतीति" श्रुतेः "विधुर्विष्णुः विधुर्विष्णौ चन्द्रमसीत्यमरः" विधिर्ब्रह्मा तौ विधुविधी अपि प्रतार्य्य वञ्चयित्वा, यो राहुः सोमममृतं पपौ अपिबत् केतुना सह वर्तत इति स केतुः स राहुः भवतामनिशं बहु कल्याणं दिश्यात् ।।

अथ दशावतारवर्णनम्

मत्स्यावतारः

स्रोतस्वतीशकमलप्रणिविष्टदैत्य
प्राणैः सहादृतसमर्पितवेदविद्यैः ।
भृग्वापवादिमुनिभिः परिसेव्यमानः
पाठीनमूर्तिरवताद्भवतो रमेशः।। {10}

।।स्रोतस्वतीति।। स्रोतस्वतीनां नदीनामीशः समुद्रस्तस्य कमलं जलं "सलिलं कमलं जलमित्यमरः" तस्मिन् प्रणिविष्टो यो दैत्यः शङ्खासुरस्तस्य प्राणैः सह आदावान् दृता पश्चात् समर्पिता वेदविद्या येभ्यस्तैः भृगुश्चापवश्च भृग्वापवौ तौ आदी येषां ते, ते च ते मुनयस्तैर्मुनिभिः

In Public domain. Digitization Muthulakshmi Research Academy

रामचन्द्रकविः

परिसेव्यमानः पाठीनमूर्तिः मत्स्यमूर्तिः रमेशो भवतो युष्मानवतात् "आपव इति वसिष्ठस्य पर्यायनाम" ।।

कूर्मावतारः

व्यासे स्वपृष्ठफलकेऽखिललोकधात्रीं
धात्रीं तृतीयखचरस्य शिवात्मजस्य ।
धात्रीं बिभर्ति फलमल्पमिवाल्पधात्र्या
यः सोऽवतात्कमठरूपधरोहरिर्वः।। {11}

।।व्यासेति।। यो हरिः व्यासे विशाले "व्यासो मुनौ स्याद्विस्तार" इति विश्वः स्वपृष्ठं फलकमिव तस्मिन्नखिललोकधात्रीं धरणीं शिवात्मजस्य तृतीय-खचरस्य तृतीयग्रहस्य मङ्गलस्य धात्रीं मातरं धात्रीं भूमिमल्पधात्र्याः ह्रस्वामलक्यारल्पं फलमिव बिभर्ति । स कमठरूपधरः कूर्मरूपधरो हरिर्वो युष्मानवतात् रक्षतु।

वराहावतारः

पद्मालयाजनकशम्बरमग्नदेहां
कुं दन्तलग्नतिलसन्निभमुद्दधार ।
यो हाटकाक्षहननाहितविश्वभद्रो
युष्मानसाववतु यज्ञवराहविष्णुः।। {12}

।। पद्मेति ।। यो विष्णुः पद्मालया लक्ष्मीस्तस्याः जनकः समुद्रस्तस्य शम्बरे जले "नीरक्षीराम्बुशम्बरमित्यमरः" मग्नदेहां कुं पृथ्वीं दन्तलग्नतिलसन्निभं

In Public domain. Digitization Muthulakshmi Research Academy

तिलसदृशं यथा स्यात्तथोद्धार हाटकाक्षो हिरण्याक्षस्तस्य हननेनाहितं स्थापितं विश्वस्मिन् भद्रं कल्याणं येनासौ यज्ञवराहः विष्णुर्युष्मानवतु।।

नरसिंहावतारः

अष्टापदाक्षसहजासुविमर्दनेड्यो
वन्द्यो घटश्रुतिसुषुप्तिदनिर्जरस्य।
वाणीशरैरवनिगैः स्तुतचित्रकर्मा
पञ्चास्यपञ्चजनरूपधरोऽवताद्वः।। {13}

।।अष्टापदेति।।अष्टापदाक्षो हिरण्याक्षस्तस्य सहजो भ्राता हिरण्यकशिपुस्तस्य असुविमर्दनेन प्राणहरणेनेड्यः स्तुत्यः घटश्रुतेः कुम्भकर्णस्य सुषुप्तिं महानिद्रां ददातीति घटश्रुतिसुषुप्तिदः स चासौ निर्जरो देवस्तस्य ब्रह्मणोऽपि वन्द्यः । अवनिगैर्भूमिगतैर्वाणीशरैः गीर्वाणैर्देवैरित्यर्थः, स्तुतं चित्रितं कर्म यस्य सः स्तुतचित्रकर्मा पञ्चास्यः सिंहः पञ्चजनो मनुष्यः “स्युः पुमांसः पञ्चजना” इत्यमरःतयोः रूपधरो नृसिंह इत्यर्थः वो युष्मानवतात् ।

वामनावतारः

आषाढकौशकमलाजिनकं दधानो
देवव्रताग्र्यजननीचरणोग्र्यवर्णी ।
यत्पज्जशम्बरमलीकदृशा विदध्रे
के कश्मलं द्यतु बलिच्छलनः स खर्वः।। {14}

।।आषाढेति।। अलीके ललाटे दृक् यस्य सः तेनालीकदृशा शिवेन यत्पज्जं शम्बरं यस्य वामनस्य पज्जं पादजातं शम्बरं जलगङ्गामित्यर्थः के मस्तके

In Public domain. Digitization Muthulakshmi Research Academy

रामचन्द्रकविः

विदध्रे धृतं बलि छलनः स खर्वो वामनो वः कश्मलं द्यतु खण्डयतु । "खर्वो ह्रस्वश्च वामन" इत्यमरः व इति शेषः कथम्भूतः वामनः आषाढः पलाशदण्डः कुशस्य जलस्येदं कौशं कमण्डलुः कमलस्य हरिणस्याजिनं कृष्णाजिनं तेषां समाहारः तद्धानः पालाशो दण्ड आषाढः "कुशमप्सु च स्यात्कुरङ्गेऽपि कमल इति स्थानत्रयेऽप्यमरः" पुनः कथम्भूतः देवव्रतस्य भीष्मस्याग्र्यजननी गङ्गा सा चरणे यस्य सः पुनः कीदृशः अग्र्यवर्णी ब्रह्मचारी ।

परशुरामावतारः

दोर्दण्डदण्डमिषदत्तनिजापवर्ग-
दोर्दण्डजोऽवनिसुरार्पितसार्वभौमः।
दोर्दण्डदण्डितरसातलदैत्यवर्गः
पृथ्वीभरापहरणोऽवतु भार्गवो वः।। {15}

।।दोरिति।। दोः दण्ड इव दोर्दण्डः भुजदण्डः तेन यो दण्डो हननं तन्मिषेण तद्व्याजेन दत्तो निजापवर्ग आत्मसायुज्यं येभ्यस्तादृशाः दोर्दण्डजाः बाहुजाः येन सः बाहुजान् क्षत्रियान् बाहुना हत्वा बाहुलीनान् कृतवानित्यर्थः। अवनिसुरेभ्यो ब्राह्मणेभ्योऽर्पिता सर्वा भूमिः येन सः सर्वभूमिपृथिवीभ्या- मणञाविति अण् प्रत्ययः दोर्दण्डेन दण्डिताः रसातले दैत्यवर्गाः येन सः अत एव पृथ्वीभरापहरणो भार्गवः परशुरामो वो युष्मानवतु।।

रामावतारः

धूमध्वजप्रवरवाहनशत्रुवाहो

In Public domain. Digitization Muthulakshmi Research Academy

दुर्बेरमित्रनिलयोत्क्षिपतुः प्रहन्ता ।
मह्यङ्गजाप्रियतमः प्रियलोकनामा
कैवल्यदोऽस्तु भवतां भवकीर्तिताख्यः।। {16}

।।धूमेति।। धूमध्वजस्याग्नेः प्रवरवाहनो मेषस्तच्छत्रुर्वानरो हनूमान् वाहो वाहनं यस्य सः। दुष्टं बेरं शरीरं यस्य सः दुर्बेरः कुबेरः "शरीरं बेरमुच्यते" इति विश्वः। तस्य मित्रं शिवस्तस्य निलयः कैलासस्तमुत्क्षिपतुः उन्मूलयतो रावणस्य प्रहन्ता प्रियं लोकानां नाम यस्य सः भवेन शिवेन कीर्तिता आख्या नाम यस्य सः मह्याः भूमेः अङ्गजा पुत्री सीता तस्याः प्रियतमः वल्लभः श्रीरामः भवतां मोक्षदोऽस्तु भवतु।।

बलरामावतारः

मुष्ट्यैकया शिशुरपि प्रबलप्रलम्ब
मूर्धानमच्छिदत तालफलं यथा यः।
यः पूर्वभक्तिपरिखिन्नमना बभूव
कृष्णाग्रजो हरतु शोकमसौ बलो वः।। {17}

।।मुष्ट्येति।। यो बलः शिशुरपि एकया मुष्ट्या प्रबलस्य प्रलम्बस्य प्रलम्बासुरस्य मूर्धानं तालफलं यथा तालफलमिवाच्छिदत छिनत्ति स्म यो बलःपूर्वया भक्त्या रामावतारे लक्ष्मणरूपेण कृतया भक्त्या परिखिन्नमनाः सन् कृष्णाग्रजो बभूव कृष्णस्याग्रजोऽसौ बलो बलभद्रः वः शोकं हरतु दूरीकरोतु।

कृष्णावतारः

काकोदरः करुणया समरक्षि येन

In Public domain. Digitization Muthulakshmi Research Academy

रामचन्द्रकविः

हर्यात्मजाप्रियसखः पवनात्मदूतः।
यः पूतनामरणगीतयशः प्रशस्तो
रामाग्रजः स भवतामपवर्गदोऽस्तु।। {18}

।।काकोदर इति।। येन करुणया कृत्वा काकोदरः कालीयनागः समरक्षि रक्षितः अन्यत्र दरोभीतः काको जयन्तो येन करुणया रक्षितः हरे–रिन्द्रस्यात्मजोऽर्जुनः प्रियसखा यस्य सः अन्य़त्र हरेः सूर्यात्मजः सुग्रीवः प्रियसखा यस्य "यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु शुका हि कपिभेकेषु हरिर्ना कपिलेत्रिष्वित्यमरः" पवनस्यात्मा पुत्रः भीमसेनः दूतो यस्य सोऽन्यत्र पवनात्मा हनूमान् दूतो यस्य सःपूतनामरणेन गीतायशः प्रशस्तिर्यस्य सोऽन्यत्र पूतं नाम यस्य सः पूतनामा रणे सङ्ग्रामे गीतायशः प्रशस्तिः प्रशंसा यस्य सः ततःकर्मधारयः रामो बलभद्रोऽग्रजो यस्य सः श्रीकृष्णोऽन्यत्र रामश्चासावग्रजश्चरामाग्रजः श्रीरामः भवतामपवर्गदो मोक्षदोऽस्तु।।

कल्क्यवतारः

सत्यप्रवर्तनपरो द्व्युपसर्गदेव–
दीर्घक्षुधापहरणः कलिकल्मषघ्नः ।
स्वर्णैकपूर्णनिखिलद्विजसङ्घयागः
कल्क्यस्तु हन्त भवतां वृजिनापहर्त्ता।। {19}

इति दशावताराः

In Public domain. Digitization Muthulakshmi Research Academy

।।सत्येति।। सत्यप्रवर्तनपरः द्वावुपसर्गौ येषां ते द्व्युपसर्गाः विप्रास्तेषां देवानां दीर्घक्षुधापहरणः कलिकल्मषघ्नः स्वर्णैरेकः केवलः पूर्णः निखिलद्विजसङ्घो यागो यज्ञो यस्य सः कल्की भवतां वृजिनापहर्त्ता पापहर्त्ताऽस्तु भवतु हन्तेति हर्षे ।

अथ त्रिमूर्तयः

विष्णुः

यः सुध्युपास्योऽवतु मध्वरिर्हरी–
र्धात्रंशभूतो भवतोऽथ लाकृतिः।
क्रय्यस्तदर्थैर्भजनेन किल्बिषं
क्षय्यस्तु जय्यो भजतामरींश्च।।{20}

।। य इति।। सुधीभिरुपास्यः सुध्युपास्यः मधोररिर्मध्वरिः धाता अंशभूतो यस्य सः धात्रंशभूतः अथ लस्य चन्द्रस्येवाकृतिर्यस्य सः लाकृतिः सोमवत्प्रियदर्शन इत्युक्तेः तदर्थैः स हरिरेवार्थः प्रयोजनं येषां तैर्भक्तैः क्रेतुं शक्यः क्रय्यः भजनेन कृत्वा किल्बिषं क्षेतुं शक्यः क्षय्यः भजतां वरीयान् यो हरिर्जय्यः स च हरिर्भवतो युष्मानवतु।

ब्रह्मा

भूदारो यस्य नोजःकनकदृगसुहाध्देष्टिवर्ष्मा विरेजे
यदृग्जो रोदनोऽसौ गुणनगरवधाद्विश्वमेतद्ररक्ष।
यद्वीर्याण्डकुशान्तः स दशशतशिराः केषु नित्यं बिभर्ति
सोमेनेन्द्राजवन्द्यः कविकुलरसनास्थाधवः कोऽवताद्वः।।{21}

Public domain. Digitization Muthulakshmi Research Academy

।।भूदार इति।। यस्य ब्रह्मणो नोजो नासिकायाः जातः पद्दन्निनितिसूत्रे प्रकृतिग्रहणस्य प्रकारार्थत्वान्नासिकाशब्दस्य नसादेशः कनकदृगसुहा सदा हिरण्याक्षप्राणहरः अन्धासाक्षादिष्टिवर्ष्मा यज्ञशरीरः इष्टिर्यागेच्छयोरित्यमरः। वर्ष्म देहप्रमाणयोरित्यमरः तत्रैव भूदारो वराहः भूमिर्दारा यस्येति विरेजे सर्वोत्कर्षेण वर्त्तते स्म यस्य ब्रह्मणो दृग्जो नेत्राज्जातोऽसौ रोदनो रुद्रः तदुक्तं श्रीमद्भागवते "यदारोदीः सुरश्रेष्ठ सोद्वेग इव बालकः। अतस्तामभिधास्यन्ति नाम्ना रुद्र इति प्रजा" इति गुणनगरवधात्त्रिपुरसंहारादेतद्विश्वं ररक्ष यस्य ब्रह्मणो वीर्याज्जातमण्डं कुशान्तः जलमध्ये कुशमप्सु चेत्यमरः स्थितं तदुक्तम्- "यदमोघमपामन्त रुतं बीजिमज त्वय्ना अतश्चराचरं विश्वं प्रभवस्तस्य गीयते" इति सः प्रसिद्धः दशशतशिराः शेषो नागः केषु मस्तकेषु नित्यं बिभर्ति उमया सह वर्तत इति सोमः शिवः, इनः, सूर्यः, इन्द्रः प्रसिद्धोऽजो विष्णुरेषां वन्द्यः कविकुलस्य रसनायां तिष्ठतीति तथोक्ता सरस्वती तस्याः धवः को ब्रह्मा वो युष्मानवतात् रक्षतु।

महेश्वरः

आम्नायारिनिहन्तृवाहनसनादन्धोमहाभूषणः
पाङ्क्तिस्यन्दिनिवैरिशीर्षनवकप्रीत्याऽर्चिताङ्घ्रिद्वयः।
चेतोजातमजमानसोद्भवशिरःपुण्ड्रोगरात्रीक्षणः
चैत्राख्यारिसुवर्णमध्यखमणिप्रत्यर्चितः पातु वः।।{22}

।।आम्नायेति।। आम्नायो वेदस्तस्यारिः शङ्खासुरः तस्य निहन्ता विष्णुः तस्य वाहनं गरुडस्तस्यासनात् सनातनमन्धोम्नं सर्पाभिस्सा स्त्री

In Public domain. Digitization Muthulakshmi Research Academy

भक्तमन्धोन्नमित्यमरः। ते महाभूषणं यस्य सः पङ्क्तिस्यन्दनो दशरथस्तस्यापत्यं पाङ्क्तिस्यन्दनो रामस्तस्य वैरी रावणस्तस्य शीर्षाणां नवकैः प्रीत्याऽर्चितम् अङ्घ्रिद्वयं यस्य सः चेतोजः कामः स आत्मजो यस्य स चेतोजात्मजः कृष्णस्तस्य मनसो जातश्चन्द्रमाः सः, शिरः पुण्ड्रः शिरसि तिलकं यस्य सः गरं विषमत्तीति गरात् चैत्राख्यो मधुस्तस्यारिर्विष्णुः सुवर्णमध्यो हिरण्यगर्भः खमणिः सूर्यः तैरर्चितः त्रीक्षणस्त्रिनयनो वः पातु।।

अथ त्रिशक्तयः

पार्वती

विषास्यमालस्य ससामिवर्ष्मा वज्राङ्गजारिप्रियलोकशर्मा ।
भूदेवदेवद्विषदुग्रकर्मा ददातु शं वो दृढभक्तवर्मा ।। {23}

।।विषास्येति।। वज्राङ्गो दितिसुतस्तस्माज्जातो वज्राङ्गजस्तारकासुरस्तस्यारिः स्कन्दस्तस्य प्रियेण प्रेम्णा यो लोकः सुदर्शनं तेन शर्म सुखं यस्याः सा "अन्नं तत्वान्नडीपूडावुभाभ्यामिति" डाप् भूदेवदेवद्विषत्सुब्राह्मणामरशत्रुषु उग्रं प्रचण्डं कर्म यस्याः सा दृढं भक्तानां वर्म कवचं तद्रूपा दृढभक्तानां वर्मेति वा विषास्याः सर्पास्ते माला यस्य तस्य शिवस्य सामि वर्मणार्धशरीरेण सह वर्त्तत इति ससामिवर्ष्मा पार्वती वो युष्मभ्यं शं कल्याणं ददातु ।।

In Public domain. Digitization Muthulakshmi Research Academy

सरस्वती

कल्पाकल्पा त्रिवेदीत्रिवलिरथ भुजौ छान्दसौ तर्कदन्ता
यद्रोमावलिस्त्वथर्वा प्रणवसुतिलकान्वीक्षिकोदन्तपङ्क्तिः।
ज्योतिःस्रग्धर्मशास्त्रं यदनुमितशिरो व्याकृतिर्यत्र काञ्ची
मीमांसोरुःपुराणद्वयकरकमला श्रेयसे साऽस्तु वाग्वः।। {24}

।।कल्पेति।। कल्पः कल्पशास्त्रमाकल्पो भूषणं यस्याः सा कल्पाकल्पा "आकल्पवेषौ नेपथ्यमित्यमरः" त्रिवेदी वेदत्रयी त्रिवलिर्यस्याः सा, अथ भुजौ छान्दसौ मात्रावर्णरूपतः छन्दसोद्भवौ तर्कशास्त्रं दन्ता यस्याः रोमावलिस्तु अथर्वा अथर्वणवेदः प्रणवः शोभनतिलकं यस्याः सा आन्वीक्षिकी दन्तपङ्क्तिर्यस्याः सा ज्योतिश्शास्त्रं स्रक्माला यस्याः सा धर्मशास्त्रं यस्यामनुमितं शिर इति यत्र यस्यां व्याकृतिर्व्याकरणं काञ्ची मीमांसोरुर्यस्याः सा पुराणद्वयं व्यासपराशराभ्यां कृतं करकमलं यस्याः सा वाक्सरस्वती वो युष्माकं श्रेयसे कल्याणाय अस्तु भवतु एतत्सर्वं नैषधादौ स्पष्टम् ।

लक्ष्मीः

रमारमाहरौ हरौ समासमाहरेहरीः ।
रमा समा नमा नमा ददातु सा तु पातु वः।। {25}

इति त्रिशक्तयः

In Public domain. Digitization Muthulakshmi Research Academy

।।रमेति।।अहरौ हरिभिन्ने न रमेत इत्यरमा, हरौ तु रमा रमतीति रमा अहरेर्हीरिभिन्नस्यासमाऽयोग्या हरेश्च समा नास्ति समा सादृश्यं यस्याः सा असमा न नमति कस्यचिदित्यनमा सर्वे नमन्ति यस्याः सा नमा सा रमा लक्ष्मीः वः युष्मभ्यं धनादिकं ददातु वः युष्मान् पातु ।

अथ दश दिक्पालकाः

शेषः

सुरासुरालकालकैः कराकराकराकरैः ।
नगानगैः खगाखगैरहिः स वोऽवतु श्रितः।। {26}

।।सुरेति।। सुराश्चासुराश्चालकायामलन्ति पर्यटन्तीत्यलकालकाः यक्षास्तैः कराणां किरणानामाकराः सूर्यादयस्तैश्च अकं दुःखं रान्ति ददतीत्यकराः राक्षसाः अकरा अहस्ताः नागास्तैश्च नगाः मेरुप्रभृतयः अनगाः किन्नरादयः तैश्च खगाः आकाशश्चारिणः सिन्धादयोऽखगाः भूमिचारिणस्तैश्च श्रितः सेवितः स प्रसिद्धोऽहिः शेषो नागो वः युष्मानवतु रक्षतु ।।

इन्द्रः

बृहच्छब्दग्रहो वाती चैलरत्नजहन्तृजः।
अनग्राभृद्गरुच्छेत्ता रातु वो भूमिनन्दनम् ।।{27}

।।बृहदिति।। वाती मरुत्वान् चैलमम्बरं तस्य रत्नं मणिरम्बरमणिः सूर्यः तस्माज्जातः कर्णस्तस्य हन्ता धनञ्जयः स जातो यस्मादिति चैलरत्नजहन्तृजः अनग्रा अनन्ता भूमिः अनग्राभृत् भूभृत् तस्य गरुच्छेत्ता

रामचन्द्रकविः
In Public domain. Digitization Muthulakshmi Research Academy

पक्षच्छेत्ता बृहच्छब्दग्रहो वृद्धश्रवाः शुनासीरः वः युष्मभ्यं भूमिनन्दनं मंगलं रातु ददातु ।

अग्निः

युगान्तसंहारविवृद्धतेजाः सूर्यात्मनाशाय च हन्तुमुद्यतः।
अजस्य दृष्ट्या हतवैरिकामः प्रभुः श्रियं वो ददतां धनञ्जयः।।{28}

।।युगान्तेति।। युगान्ते प्रलये संहाराय विवृद्धं तेजो यस्य सोऽन्यत्र युगान्ते द्वापरान्ते महाभारतप्रवृत्तानां संहाराय विवृद्धतेजाः सूर्यात्मना सूर्यरूपेणाप्याशाय जगद्भक्षणाय हन्तुमुद्यतोऽन्यत्र सूर्यस्यात्मा पुत्रः कर्णः "आत्मा वै पुत्रनामासीति" श्रुतेः, तस्य कर्णस्य नाशाय हन्तुमुद्यतः अजस्य शिवस्य दृष्ट्या नेत्ररूपेणाहतो वैरिभूतः कामोऽनङ्गो येन सोऽन्यत्राजस्य श्रीकृष्णस्य "अजो हरौ कामे विधातरि रघोः सुत" इति वैजयन्ती । दृष्टौ दृष्टिगोचरे दृष्टिर्ज्ञानेऽक्षिदर्शन इत्यमरः आहतो वैरिणां कामो मनोरथो येन सः प्रभुः समर्थः धनञ्जयोऽग्निरर्जुनश्रवो युष्मभ्यं श्रियं ददताम् ।।

यमः

दृक्कर्णशत्रुध्वजदक्षिणाजो दर्भास्य वन्द्यः समयानलेक्षणः।
श्राद्धामरः सर्वभविप्रहारको वाहारिवाहस्त्वभयायसोऽस्तु वः।। {29}

।।दृगिति।। दृक्कर्णाः सर्पास्तेषां शत्रुर्गरुडः स ध्वजो यस्य सः गरुडध्वजस्तस्य दक्षिणा दक्षिणमक्षिः सूर्यस्तस्माज्जातः दर्भास्याः बर्हिर्मुखा देवास्तेषां वन्द्यः समयानलः कालाग्निरीक्षणं यस्य सः सर्वेषां भविनां

In Public domain. Digitization Muthulakshmi Research Academy

संसारिणां प्रहारकः वाहोऽश्वस्तस्यारिर्महिषः स वाहो वाहनं यस्य श्राध्दामरः श्राध्ददेवो यमः वो युष्माकमभयायास्तु ।

विभीषणः

अनुलोमविलोमाभ्यां सरसः सरसो भवेत्।
साक्षराः पठितास्तद्वद्रक्षन्तु त्वां द्वयेऽपि ते ।। {30}

।। अनुलोमेति।। अनुलोमविलोमाभ्यां क्रमव्युत्क्रमाभ्यां पठितः सरसः सरसो भवेत् सरस श्रृङ्गारादियुक्तः इति च तद्वदनुलोमविलोमाभ्यां पठिताः साक्षराः पण्डिताः साक्षरारा‌क्षसा इति भवेयुः ते द्वयेऽपि द्विरूपाः साक्षराः विद्वांसः राक्षसाः विरूपाक्षा विभीषणादयस्त्वां रक्षन्तु ।।

वरुणः

रसेन लोकान्परितोषयन्मुदा मुक्ताफलैर्दीनजनान्विनोदयन् ।
काव्यस्य कर्ता कुमुदं विधाता शं रातु वो ब्रह्मसमः प्रचेताः।। {31}

।।रसेनेति ।। रसेन जलेनान्यत्र शृङ्गारादिना मुदा हर्षेण लोकान् परितोषयन् मुक्ताफलैर्मौक्तिकैर्दीनजनान् दुर्गतान् विनोदयन् अन्यत्र मुक्तानां मुक्तिगतानामासमन्तात् फलैर्लाभैः फलं लाभशराग्रयोरिति विश्वः वेदान्त-वैराग्यादिना मुक्तिं गतानामफलैः स्रक्चन्दनवनितादिनिषिद्धविषयैरिति वा दीनजनान् दुःखितान्विनोदयन् कविर्भृगुः स एव काव्यः तस्य शुक्रस्यापि कारणं तु स एव काव्यस्य कर्ता "भृगुर्वै वारुणिरिति" श्रुतेः अन्यस्य काव्यस्य कवित्वस्य कर्त्ता कुमुदं कमलविशेषं विधाताऽन्यत्र कौ भूमौ मुदं

In Public domain. Digitization Muthulakshmi Research Academy

हर्षं विधाता ब्रह्मसम इत्युभयत्र प्रचेताः वरुणः प्रकृष्टं चेतो यस्येति प्रचेताः पण्डितश्च वः युष्माकं शं कल्याणं रातु ददातु।।

वायुः

शब्दग्रहघ्नाग्रजदुःशरीरकनिष्ठशत्रुप्रियदूततातः ।
अकायकायप्रदहप्रमित्रं प्रमर्दनोऽवत्वखिलासुरत्र वः।। {32}

।।शब्दग्रहेति।। शब्दग्रहः कर्णस्तं हन्तीति शब्दग्रहघ्नोऽर्जुनस्तस्याग्रजो भीमसेनस्तस्य दुःशरीरः कुबेरस्तस्य कनिष्ठो रावणस्तस्य शत्रुः रामस्तस्य प्रियदूतो हनूमान् तस्य च तातः पिता अकायोऽनङ्गस्तस्य कायं शरीरं प्रदहतीति अकायकायप्रदहोऽग्निस्तस्य मित्रम् अखिलासुरखिलप्राणः प्रमर्दनो मर्दकः वो युष्मानत्रावतु।।

कुबेरः

सशिवो वित्तरः प्रज्ञः पुरारिपुरसंश्रयः।
नक्षत्रमालाभरणो राजा रातु सुखं तु ते ।।{33}

।। सशिव इति।। शिवेन शम्भुनेत्युभयत्र अन्यत्र शिवेन कल्याणेन सह वर्तत इति शिवः वित्तं धनं राति ददातीति वित्तरः इति सर्वत्र प्रज्ञो बुद्धिमान् चन्द्रपक्षे प्रकृष्टोज्ञः पुत्रो यस्य सः पुरारेः शिवस्य पुरं कैलासं संश्रयो गृहं यस्य सः कुबेरपक्षे चन्द्रपक्षे तु पुरारिः पुरं शरीरं संश्रयः स्थानं यस्य सः "पुरं पुरे शरीरे चेति विश्वः" राजपक्षे तु पुरा पूर्वमरीणां पुरं शत्रुनगरं संश्रयो गृहं यस्य सः शत्रून् हत्वा तेषां देशाः स्ववशीकृता इति भावः

In Public domain. Digitization Muthulakshmi Research Academy

नक्षत्रमालाभरणं भूषणं यस्य सः "सैव नक्षत्रमाला स्यात् सप्तविंशतिमौक्तिकै"रित्यमरः चन्द्रपक्षे नक्षत्राणां तारकानां मालायाः पङ्क्तेः भरणः पोषकः तासां भर्तृत्वात्, राजपक्षे तु न इति पृथक्पदं विसर्गलोपः क्षत्राणां राज्ञाम् अराज्यलक्ष्मीस्तस्याः लाभे रणः सङ्ग्रामो यस्य सः राजा कुबेरश्चन्द्रश्च भूपतिरिन्द्रश्च राजा प्रभौ नृपे चन्द्रे यक्षे क्षत्रियशक्तयोः ते तुभ्यं सुखं रातु ददातु।।

हर्यर्चिताङ्घ्रिर्हरिभूषणो हरिश्चूडामणिर्यस्य हरित्वगम्बरः।
हरिर्यमानर्च दृशा हरिं दृशा ददाह यः सोऽवतु वः सदा हरः।। {34}

।।हरीति।। हर्यर्चिताङ्घ्रिरिन्द्रपूजितचरणः हरिभूषणो नागभूषणः हरिश्चन्द्रः यस्य चूडामणि शिरोरत्नं हरित्वगम्बरः शार्दूलचर्मवसनः हरिरूपेन्द्रः दृशा नेत्रेण यमानर्च अपूजयत् यः दृशा हरिं कालं ददाह स हरः वः सदाऽवतु कोशस्तु पूर्वमुक्तः श्वेतनाम्नो ब्राह्मणस्यार्थे हरः कालं ददाहेति विष्णुधर्मोत्तरे आख्यायिका गीयते ।।

ब्रह्मा

वेदाम्बादक्षपार्श्वे द्विजगणयमिनां मानसस्यैकहंसा
वामाङ्गे भाषितेशा विलसति सकलप्राणिधात्री च यस्य ।
नैमिष्योन्मेषताभ्यां लयमुदयमिदं याति विश्वं च यस्य
ब्रह्मा ब्रह्मैकवेद्यः स दहतु जननक्लेशदुःखं विभुर्वः।। {35}

इति दश दिक्पालकाः

In Public domain. Digitization Muthulakshmi Research Academy

।।वेदेति।। द्विजगणानां यतीनां च मानसस्यैकहंसा ध्यानगोचरेत्यर्थः वेदाम्बा वेदमाता गायत्री यस्य दक्षपार्श्वे दक्षिणपार्श्वे विलसति सकलप्राणिधात्री– भाषितशसरस्वती च वामभागे विलसति वर्तते। निमेषस्य भावो नैमिष्यं उन्मेषस्य भावः उन्मेषता यस्य नैमिष्योन्मेषताभ्यामिदं विश्वं लयमुदयं च याति ब्रह्मैकवेद्यो वेदैकारामः स ब्रह्मा वो युष्माकं जननस्य च यः क्लेशस्तस्य दुःखं हरतु जननस्य दुःखं क्लेशानामविद्यास्मितारागद्वेषाभिनिवेशानां च दुःखमिति वा।

स्कन्दः

स्तम्बेरमेंद्रारिनिषूदनप्रिया वात्सल्य हस्ताङ्गुलिलालिताननः।
अब्ध्यात्मजार्यङ्कतले लुठन्द्विदन्नव्यादिवान्यो भवतः स्मरो गुहः।। {36}

।।स्तम्बेरमेति ।। स्तम्बेरमो गजः इन्द्रारिरसुरः तयोः कर्मधारयः गजासुर इत्यर्थः, तस्य निषूदनो हन्ता शिवस्तस्य प्रिया पार्वती तया वात्सल्येन कृत्वा हस्ताङ्गुलिभिर्लालितमाननं यस्य सः अन्यत्र स्तंबेरमः कुवलयापीडः इन्द्रारिः कंसः तयोर्निषूदनः श्रीकृष्णः तस्य प्रिया रुक्मिणी अन्यत् पूर्ववत् अब्ध्यात्मजो जलन्धरः तस्यारिः शिवस्तस्याङ्कतले उत्सङ्गो परिलुठन् लोठमानः अन्यत्र अब्ध्यात्मजा लक्ष्मीः रुक्मिणी तस्याः आर्यश्रीकृष्णं प्राप्येत्यध्याहार्यं शीर्षभागेन लुठन् द्वौ दन्तौ यस्येति द्विदन् इत्युभयत्र बालभावात् अपरोऽन्यः स्मरः प्रद्युम्न इव स्थितः गुहः स्कन्दो भवतो युष्मान् अव्यात् पायात् ।।

In Public domain. Digitization Muthulakshmi Research Academy

हेरम्बः

उन्मत्तप्रसवं शिवप्रियतमं नीत्वा शयेनाथत–
च्छ्रीकण्ठस्य च कण्ठलम्बिफणिनो वक्त्रेपुनर्दत्तवान्।
इत्थं तत्फलकण्टकक्षतमुखे शीत्कुर्वतीलाशये
हेरम्बः प्रजहास बालकतया यः सोऽवताद्वः प्रभुः।। {37}

।।उन्मत्तेति।। इत्थममुना प्रकारेण तत्फलस्य धत्तूरफलस्य कण्टकैः क्षतमुखे इलायां भूमौ शेते इति इलाशयो नागः इलाशब्देन तद्विवरं लक्ष्यते तस्मिन्नागे शीत्कुर्वति शीत्कारशब्दं कुर्वति सति यो हेरम्बः गणेशो बालकतया प्रजहास हसति स्म, स हेरम्बः प्रभुर्वोऽवतात्। कथम्भूतो हेरम्भः शिवप्रियतमम् उन्मत्तप्रसवं धत्तूरफलं शयेन शुण्डादण्डेन नीत्वाऽऽदायाथादानानन्तरं तद्धत्तूरफलं श्रीकण्ठस्य शिवस्य कण्ठलम्बिनः फणिनो नागस्य वक्त्रे मुखे पुनर्दत्तवान् ।।

भैरवः

पीयूषं पिबतीश्वरे निपतिते शार्दूलचर्मासने
तद्बिन्दौ तदनुत्थितश्चमृगराट् दुद्राव भीतो वृषः।
तं दृष्ट्वा कृतहस्ततालमसकृत्प्रोच्चैर्जहास द्रुतं
सोऽसौबालकभैरवः प्रतिदिनं दिश्यात्सवो मङ्गलम् ।। {38}

।।पीयूषमिति।। ईश्वरे शिवे पीयूषममृतं पिबति सति, तद्बिन्दौ पीयूषबिन्दौ शार्दूलचर्मासने निपतिते सति तदनु तत्पश्चात् मृगराट् सिंहः उत्थितः अमृतबिन्दुस्पर्शमात्रेण सजीवो जात इत्यर्थः, च पुनः भीतो वृषः दुद्राव

In Public domain. Digitization Muthulakshmi Research Academy

पलायनं चकार । द्रुतं पलायितं तं वृषं दृष्ट्वा यो भैरवः कृतहस्ततालं यथा स्यात्तथाऽसकृत्पुनःपुनः प्रौच्चैर्जहास हसति स्म सोऽसौ बालकभैरवो वटुकभैरवः प्रतिदिनं वो मङ्गलं दिश्यात् ददातु।।

अश्विनौ

कजौ कदौ कात्प्रतिपन्नविद्यौ यमौ यमप्रेष्यगदापवारकौ।
उल्लाघयन्तौ व्रणिनो गदाहतानाद्यर्क्षनाथाववतां रुजो वः।। {39}

।। कजाविति ।। कजौ सूर्याज्जातौ कदौ सुखप्रदौ कात् ब्रह्मणः प्रतिपन्नविद्यौ यमौ युग्मजातौ "यमो दण्डधरेध्वाङ्क्षे संयमे यमजेऽपिचेति विश्वः" यमस्य प्रेष्यादूताः ये गदारोगाः तानपवारकौ व्रणिनो व्रणवतो गदाहतान् रोगग्रस्तानुल्लाघयन्तौ निरामयान् कुर्वन्तौ आद्यर्क्षनाथौ प्रथमनक्षत्रस्वामिनौ अश्विनीकुमारौ वो युष्मान् रुजो रोगादवतां रक्षताम् ।।

हरिः

तारापतिश्लाघ्यसुदर्शनोऽसौ यशोदयाश्लिष्टतनुः स रामः।
समीरसून्वाहितहार्दसम्पद्ददातु शर्म द्विविधो हरिर्वः।। {40}

।।तारेति।। तारापतेः सुग्रीवस्य श्लाघ्यं शोभनं दर्शनं यस्य सः, अन्यत्र तारापतिश्चन्द्र इव श्लाघ्यं शोभनं दर्शनं यस्य सः, यशश्च दया च यशोदये- ताभ्यामाश्लिष्टा तनुर्यस्य सः अन्यत्र यशोदया मात्राऽश्लिष्टतनुः रामया सीतया सह वर्तत इति स रामः अन्यत्र बलरामसहितः समीरसूनौ वायुपुत्रे हनूमति अन्यत्र भीमसेने आहितं स्थापितं हार्दं दयासम्पदैश्वर्यं च

In Public domain. Digitization Muthulakshmi Research Academy

येन सः द्विविधो द्विरूपोऽसौ हरिः रामकृष्णरूपो वो. युष्मभ्यं शर्म सुखं ददातु।।

स्वस्थं नदीनादरमज्जनानघं
राजारमानेष्वरतं दयोदयम् ।
अपुण्यलोकाद्विनिवार्य सन्ततं
सदा नवं त्वावतु मां च वामनः।। {41}

।।स्वस्थमिति।। स्वस्मिन्वामने तिष्ठतीति स्वच्छस्तमित्युभयत्र मनःपक्षे स्वस्थं कामक्रोधाकलुषितप्रकृतीत्यर्थः वामनपक्षे स्वच्छ इति विभक्तिविपरिणामः खर्परे शरीति लुप्तस्य विसर्गस्य प्रश्लेषः नदीनाः महान्तः नञर्थस्य सुप्सुपेति समासः तेषामासन्ताद्दूरे भये यन्मज्जनमायत्तता तेनानघं दुःखरहितमित्युभयत्र मनःपक्षे नदीनामिना स्वामिनी गङ्गा तस्यामादरेण–यन्मज्जनं स्नानं तेनानघं निष्पापं वामनपक्षे तु नदीनो गम्भीरो भक्तोपरि य आदरस्तेन मज्जनो मल्लक्षणो जनः अनघो निर्व्यसनो यस्मादिति नदीनादरमज्जनघः दुःखैर्नोव्यसनेष्वघमित्त्यमरः तथा राति ददातीति राः वदान्यो न तु रायोरूपं जारो व्यवायः मानोहङ्कारस्तेष्वरतं विरक्तमिति त्रिष्वपि विशेषणं वामनपक्षे राज्ञो बलेरासमन्तात् रमा राज्यलक्ष्मीरनोजीवनमिषवोऽस्त्राणि– तेष्वरतोऽमर्षणः दयाया उदयो यस्य दयया कृत्त्वा उदुत्कृष्ट अयः शुभविधिर्यस्येति वा इति चतुर्ष्वपि विशेषणं सदा सर्वदा नास्ति अवो रक्षको यस्येति सदा नव इत्युभयत्र मनःपक्षे सदा नवं नूतनं परमाणुरूपत्त्वात् वामनपक्षे तु दानवेन बलिना सह वर्त्तत इति सदा

In Public domain. Digitization Muthulakshmi Research Academy

नवो वामनो विष्णुः कर्त्ता वा पक्षान्तरे मनःकर्तृ अपुण्यलोकान्नरका-न्मनःकर्तृत्वे पापिष्ठजनाद्विनिवार्यत्वात् त्वां मां च सततं सदा अवतु रक्षतु।

स्वर्णदृष्टिप्रदानेन रसोद्विभ्रन्महामहः।
वराहोहोददच्छ्रेयः प्रह्लादयतु वो मनः॥ {42}

॥स्वर्णेति॥ रसां भूमिमुद्विभ्रत् अन्यत्र रसान् शृङ्गारादीनुद्विभ्रत् महामहः महोत्सवः अन्यत्र महातेजः महश्चोत्सवतेजसोरित्यमरः श्रेयः कल्याणं ददातु इत्युभयत्र वराहो विष्णुः कर्ता वरं च तदहः उत्कृष्टदिनं च कर्तृसमासान्त- विधिरनित्यः स्वर्णदृष्टिप्रदानेन हिरण्याक्षप्रखण्डनेन अन्यत्र स्वर्णं च दृष्टिरालोकनं च तयोः प्रदानेन वितरणेन अहो आश्चर्ये वो युष्माकं मनः प्रह्लादयतु आनन्दयतु विशेषणत्रयं तु मनस्यपि योज्यम्॥

गायत्री

श्रुत्यक्का च सरस्वती दुरधरां धात्र्यौ जनानामुभे
कुर्वन्त्यौ कमलासनस्थमखिलं प्राणीशमब्जासने।
ब्रह्माणं हरिशङ्करेन्द्रविबुधैः संसेव्यमानं मुदा
ते देवेशमुनीन्द्रपूजितपदे युष्मान्सदा रक्षताम्॥ {43}

॥श्रुत्यक्केति॥ श्रुत्यक्का वेदमाता गायत्री च पुनः सरस्वती ते उभे युष्मान् सदा रक्षतां कीदृशौ ते जनानां धात्र्यौ मातरौ पुनः कीदृशौ कमलासनस्थं पुनरखिलप्राणीशं तथा हरिशङ्करेन्द्रविबुधैर्मुदा संसेव्यमानं ब्रह्माणं दुरधरां दुरधरायोगं कुर्वत्यौ उभयपार्श्वस्थितत्वात् चन्द्रमसः उभयपार्श्वस्थितैर्ग्रहै-

In Public domain. Digitization Muthulakshmi Research Academy

दुरधरानामयोगोभवति उक्तं च सारावल्यां सुनफानफादुरधराः क्रमेणयोगा भवन्ति रविरहितैः वित्तान्त्योभयसंस्थैः कैरवकुलबान्धवाद्विहङ्गैरिति पुनः कथम्भूते अब्जे कमले आसने ययोस्ते तथा मुदा देवानामीशैर्मुनीन्द्रैश्च पूजितपदे ॥

लक्ष्मीः

यस्या भ्रातेशमूर्ध्नि स्थितिमकृतपतिर्मानसे तस्य हंसो
यत्पुत्रेण त्रिलोकी विधिशिवसहिता निघ्नतां स्वस्य निन्ये ।
यस्या द्वारेऽणिमाद्यादिगधिपविभवा यत्कटाक्षस्य लेशाः
सा लक्ष्मीर्नित्यमास्तां तव सुभगगृहे सर्वलोकैकधात्री ॥ {44}

॥**यस्या इति**॥ यस्याः लक्ष्म्याः भ्राता चन्द्रः ईशस्य मूर्ध्नि स्थितिमकृत कृतवान् । यस्याः पतिर्नारायणस्तस्य ईशस्य शिवस्य मानसे अन्तःकरणे हंसः तद्ध्यानगोचर इत्यर्थः यस्याः पुत्रेण मन्मथेन विधिशिवसहित त्रिलोकी स्वस्य निघ्नतामायत्ततां निन्ये नीता यस्याः द्वारे अणिमाद्या अष्टसिद्धयः वर्तत इति शेषः दिशामधिपानामिन्द्रादीनां विभवाः यस्याः कटाक्षलेशाः सर्वलोकैकधात्री सा लक्ष्मीः हे सुभग तव गृहे नित्त्यमास्तामस्तु ॥

ट्टेट्टेट्टे स्म संङ्घः क्रमपदसहितैर्वेदघोषैर्मुनीनाम्
झञ्झञ्झञ्प्सरोभिः कलिरिति विदधे नूपुराणां स्म नृत्यैः।
ढिं ढिं ढिं व्योम्निचक्रुस्ततघनपटहैः सार्द्धमानद्धढक्का
हाहाहूह्वादिमुख्यैः सरिगमपधनिर्गीयते किन्नरैः स्म ॥ {45}

 Public domain. Digitization Muthulakshmi Research Academy

।।ईट्टे इति।। युग्मेनाऽह यस्याः भवान्याः युद्धयज्ञे मुनीनां सङ्घः क्रमपदसहितैर्वेदघोषैः अट्टे अट्टे कैलासस्य प्राकारे प्राकारे स्थित्वा ईट्टे स्म स्तौति स्म अप्सरोभिः नृत्यैः करणैः झञ्झञ्झञ्िति नूपुराणां कलिः कलहः विदधे विहितः स्म आनद्धढक्काः ततघनपटहैः सार्द्धव्योम्नि ढिं ढिं ढिं चक्रुः हाहा हूह्वादिमुख्यैः किन्नरैः सरिगमपधनिर्गीयते स्म "ततं वीणादिकं वाद्यमानध्दमुरजादिकं । वंशादिकं तु सुषिरं कांस्यतालादिकं घन"मित्यमरः भरतशास्त्रे सरिगमपधनिरितिसप्तानां स्वराणां सप्ताक्षराणि साङ्केतितानि एकवद्भावश्च।।

चण्डिका

चण्डासृग्बीजशुम्भासुरवधमुदितस्तुष्टुवे सिध्दसङ्घो
यस्या भूदेवदेवप्रविदितसुरभेर्युद्धयज्ञे भवान्याः।
सा भक्तार्त्ति प्रहर्त्री स्थिरचरजगतामम्बिकेन्द्रादि वन्द्या
लोकेशस्तूयमाना वितरतु भवतामर्थमारोग्यमायुः ।।{46}

।।चण्डेति।। चण्डश्चासृग्बीजः रक्तबीजः शुम्भासुरश्च तेषां वधेन मुदितः सिद्धसङ्घः तुष्टुवे कथम्भूतायाः भवान्याः भूदेवानां ब्राह्मणानां देवानां च प्रविदितसुरभेः प्रसिद्धकामधेनोः भक्तार्तिप्रहर्त्री भक्तपीडाहारिणी स्थिरचराणां स्थावरजङ्गमानां जगतामम्बिका या माता इन्द्रादिवन्द्या लोकानामीशैः स्तूयमाना सा भवानी भवतामर्थमारोग्यमायुश्च वितरतु ददातु ।।

गङ्गा

In Public domain. Digitization Muthulakshmi Research Academy

पङ्कैः पङ्कपयोभिर्हरति कुचपयः पानमेतज्जनन्याः।

श्रीमद्विष्णोः समीपं नयति समयिनः श्रद्धया मज्जतोया।। {47}

।।पङ्कैरपि।। या गङ्गा पङ्कैः कर्द्दमैः पङ्कं पापं हरति पयोभिः स्वकीयजलैरेतत्प्रत्यक्षानुभूतं जनन्याः कुचपयः पानं हरति या गङ्गा श्रद्धया मज्जतः स्नानं कुर्वाणान्समयिनो भक्तान् श्रीमद्विष्णोः समीपं नयति प्रापयति सा भीष्मसूर्गङ्गा सगरतनयवत् वः पुनातु कथम्भूता भीष्मसूः दोषाणां वाङ्मनःकायजानां त्रयं दोषत्रयी तस्याः शमाय स्व पयसि पततां मज्जतामेषां चतुर्दोषं कुर्वतीति विरोधः चतुर्भुजत्वं विष्णुसारूप्यं कुर्वतीति परिहारः।।

कामधेनुः

स्वस्मिन्धृतानि मधुराणि पयांसि लोकान्

मातेव पाययति या परिधार्यमाणा ।

तानोषधेन च गदात्परिरक्ष्यमाणा–

नन्तेन केषु विधृताऽवतु वः सदा गौः।।{48} इति मातरः

।।स्वस्मिन्निति।। स्वस्मिन्शरीरे धृतानि मधुराणि पयांसि जलान्यन्यत्र दुग्धान्यपरत्र स्तन्यानि स्वदेहे उत्सङ्गे च परिधार्यमाणा या गौर्माता जनित्रीव लोकान् जनान् आत्मीयांश्च पाययति पानं कारयति तान् लोकानौषधेन हरीतक्यादिना नवनीतादिना च गदाद्रोगात् परिरक्ष्यमाणा अनन्तेन शेषनागेन केषु शिरस्सु विधृता अन्यत्र श्रीकृष्णेन केषु जलनिमित्तेषु गोवर्धनमुत्पाट्य

In Public domain. Digitization Muthulakshmi Research Academy

विधृता रक्षिता, अन्यत्र अनन्तसङ्गेन तद्धर्त्रा केषु सुखनिमित्तं विधृता रक्षिता, गौर्भूमिर्धेनुश्च वो युष्मान् सदा निरन्तरम् अवतु रक्षतु ॥

अथेश्वरवाहाः

गरुडः

पद्माप्तसूतावरजो विषघ्नपीयूषकुम्भाहितपञ्चशाखः।
गरुत्मरुद्धूतरसाधरेन्द्रो दृक्कर्णवैरिर्विधवोऽवताद्वः॥ {49}

॥पद्मेति॥ पद्माप्तः सूर्यस्तस्य सूतोऽरुणस्तस्यावरजः वल्लभः पीयूष-कुम्भोऽमृतकलशः आहितः स्थापितः पञ्चशाखे पाणौ यस्य सः गरुतां पक्षाणां मरुद्भिः धूताः कम्पिताः रसाधरेन्द्राः भूधराः येन सः दृक्कर्णानां चक्षुःश्रवसां वैरिः वीनां पक्षिणां धवो विधवो गरुडो वो युष्मानवतु रक्षतु ॥

नन्दीश्वरः

जङ्गन्ति यः शब्दगुणं विपक्षो नेनेति मालामिव शङ्करं खे ।
चरीकरोति स्म तृणं यथास्त्रं युद्धे पुरस्यावतुवस्सनन्दी ॥ {50}

॥जगन्तीति॥ विपक्षःपक्षरहितोऽपि यो नन्दी शब्दगुणमाकाशं जंगन्ति अतिशयेन गच्छति खे आकाशे शङ्करं मालामिव नेनेति अतिशयेन नयति युद्धे पुरस्य त्रिपुरासुरस्यास्त्रं तृणं तृणमिव चरीकरोति स्म अतिशयेन चकार सर्वत्र यङ्लुगन्तः स नन्दी वोऽवतु रक्षतु॥

In Public domain. Digitization Muthulakshmi Research Academy

हनूमान्

पनीपत्ति स्माब्धेः पदमिव शिशोः पारमलघो-
र्यती वेहानादिं भवजलधिमद्धा पशुपतिः।
पुरा यो दन्दाढ्यैलविलनिलय़ोन्मूलनकृतः
पुरीं रारष्टु त्वां रघुपतिपदात्मा स हनुमान् ।। {51} इतीश्वरवाहाः

।।पनीपत्तीति।। यो हनूमान् अलघोर्विशालस्याब्धेः समुद्रस्य पारं शिशोर्बालस्य पदमिव पनीपत्ति स्म अतिशयेन जगाम पद गतौ यङ्लुगन्तः नीग्वञ्चुस्त्रंस्वित्त्यनेन नीगागमः कः कमिव यती योगीश्वरः "ये निर्जिते-न्द्रियग्रामा यतिनो यतयश्चते" इत्त्यमरः इह संसारे अनादिं भवजलधिं संसारसागरमुल्लङ्घ्येव कीदृशो यो हनूमान् अद्धा साक्षात् पशुपतिः शिवः रुद्रावतरत्वात् यो हनूमान् एलविलस्य कुबेरस्य "यक्षैकपिङ्गैलविल" इत्यमरः निलयः कैलासः तस्योन्मूलनमुत्पाटनं करोतीत्यैलविल-निलयोन्मूलनकृद्रावणस्तस्य पुरीं लङ्कां पुरा पूर्वं दन्दाढि अतिशयेन ददाह "दह भस्मीकरणे" यङ्लुगन्तः होढ इति ढत्वं झषस्तथोर्धोध इति धत्वं ष्टुत्वं ढोढे लोपः ढ्रलोप इति पूर्वस्य दीर्घः जपजभेत्यादिनाऽभ्यासस्य नुमागमः यावत्पुरा निपातयोर्लीडिति पुरा योगे लट् स हनूमान् त्वां रारष्टु अतिशयेन रक्षतु। रक्षपालने यङ्लुगन्तः स्कोरिति कलोपः दीर्घोक्ति इत्याभ्यासदीर्घः कीदृशः स हनूमान् रघुपतिपदयोः श्रीरामचन्द्रचरणयोरात्मा मनो यस्य सः ।

In Public domain. Digitization Muthulakshmi Research Academy

अथ सत्त्यः

अरुन्धती

जेजेति या सर्वसतीषु गौर्याः सख्यात्मभूसुततपः परिपाकसिद्धिः ।
देदेत्युमेव महसोपयमेवदृष्टा ततन्ति शं प्रदयतां कमरुन्धती वः ।। {52}

।।जेजेतीति।। या अरुन्धती जगति सर्वसतीषु मध्ये जेजेति अतिशयेन जयति सर्वोत्कर्षेण वर्तते यङ्लुगन्तः गौर्याः सखी आत्मभूसुतस्य वसिष्ठस्य तपसो यः परिपाकस्तस्य सिद्धिः या महसा उमेव पार्वतीव देदेति अतिशयेन दीप्यते यङ्लुङन्तः उपयमे विवाहे दृष्टा सतीशं कल्याणं ततन्ति अतिशयेन तनोति सा अरुन्धती वो युष्माकं कं सुखं यथा भवति तथा प्रदयतां रक्षतां देङ्पालने विवाहे अरुन्धतीदर्शनं क्रियते ।।

अनसूया

भर्गे स्म जञ्जनति केशहृषीकनाथाः
पम्फुल्यतेऽत्रिवपुषा स्म तपश्च यस्याः ।
बोभोति सर्वपतिदैवतवर्गमध्ये
देदेष्टु भावुकमसौ भवतेऽनसूया ।।{53}

।।भर्गेति।। को ब्रह्मा ईशो हरः हृषीकनाथो हरिः ते केशहृषीकनाथाः यस्याः गर्भे जञ्जनति स्म अतिशयेन जज्ञिरे यङ्लुङ्न्तः यस्यास्तपश्चात्रिवपुषा त्रिशरीरेण पम्फुल्यते स्म अतिशयेन फलति स्म यङ्लुङन्तं चरफलोश्चेति नुम् उत्परस्यात इत्युत्वं या सर्वपतिदैवतवर्गमध्ये सर्वपतिव्रतासमूहमध्ये

In Public domain. Digitization Muthulakshmi Research Academy
बोभोति अतिशयेन भवति असौ अनसूयाऽत्रिपत्नी भवते तुभ्यं भावुकं कल्याणं देदेष्टु अतिशयेन दिशतु उभावपि यङ्लुङन्तौ ।।

शाण्डलीस्वयंप्रभा

पतद्राजः पक्षा मुनिगणसपर्यार्चितपदो
निनीषोर्वैकुण्ठं जगलुरपि कोष्णेन मनसा।
अमुष्याः शाण्डिल्याविभुनि परमे ब्रह्मणि विदो
सती सा ज्ञानं वो दिशतु पुनरेवाक्षयपदम् ।। {54} इति सत्त्यः

।।पतदिति।। पततां पक्षिणां राट् पतद्राट् तस्य पतद्राजः गरुडस्य पक्षाः अमुष्याः शाण्डिल्याः कोष्णेन ईषत्तप्तेनापि मनसा जङ्गलुः गलन्ति स्म सती साध्वी शाण्डिलीस्वयंप्रभानाम्नी याज्ञवल्क्यपत्नी वो ज्ञानं दिशतु पुनरेवाक्षयपदं दिशतु। कीदृशस्य पतद्राजः वैकुण्ठं नेतुमिच्छतीति निनीषोः कीदृश्याः शाण्डिल्याः मुनिगणैः सपर्ययाऽर्चितपदः पूजितचरणायाः पुनः विभुनि व्यापके परमे ब्रह्मणि वित् बुद्धिर्यस्यास्तस्याः पुरा किल भगवान् गरुडः समुद्रतीरे तपस्यन्ती ब्रह्मभूयकल्पाम् अतिलक्ष्मीं शाण्डिलीं दृष्ट्वा वैकुण्ठे विष्णुसमीपमेनां नेष्यामीति सस्मार र्व ततः सभुतदया शाण्डिलीक्रुद्धेनैवं मनसाऽस्य पक्षान् पातयामासेति भारते।

गुरुः

क्षत्तेनस्याऽधुना पादविजितकरणस्त्वात्मभूर्भिक्षुरीशः
सर्वाश्यग्निः क्षयीग्लौः पुनरपि च गणपो मद्यपाश्चण्डिका सा ।
विष्णुः शेते श्रमार्त्तः कमलसुनिलयां चञ्चला साऽपि वाणी

In Public domain. Digitization Muthulakshmi Research Academy

शक्रः कुक्षिम्भरिस्ताद्भुवि दिवि सुखदो मोक्षदः श्रीगुरुर्वः।। {55}

।।क्षतेनेति।। इनस्य सूर्यस्य क्षत्ता सारथिरघुनाद्यापीत्यर्थः, अपात्पादरहितः यस्य सारथिरधुनापि पादरहितः स तव किं करिष्यतीत्यादि सर्वत्रोह्यम् आत्मभूर्ब्रह्माऽविजितकरणस्त्वजितेन्द्रियः स्वसुताभिलाषीत्यर्थः। ईशः शिवः भिक्षुर्भिक्षुकः अग्निः सर्वाशी सर्वभक्षकः, ग्लौश्चन्द्रः क्षयी क्षयरोगी, गणपो पिपशुः गजमुखत्त्वात् सा चण्डिका मद्यपाः सुरापी विष्णुः श्रमार्तः सन्नुदधौ शेते कमलसुनिलया लक्ष्मीश्चञ्चला सा वाण्यपि सरस्वती चञ्चला लक्ष्मीः क्रिया चञ्चला सरस्वतीवाक्चञ्चला कूक्षिम्भरिरुदरम्भरिः तर्हि रक्षकः किं गलितः नेत्याह भुवि दिवि च सुखदः मोक्षदश्च वो युष्माकं श्रीगुरुस्तात् भवतु ।।

ब्राह्मणाः

चन्द्रो यैस्तुकृतःक्षयी जलनिधिः क्षारो बिडौजाभ गो
लिङ्गंपातितमैश्वरं मधुरिपुस्तिर्यक्षु शौद्रे यमः ।
स्वर्गाद्यौर्विनिपातितिश्चनहुषो वेनःप्रमत्तो गिरा
दिव्यायैरुरगाः शुचौ किल हुतास्ते ब्राह्मणाः पान्तु वः।। {56}

।।चन्द्र इति।। यैश्चन्द्रःक्षयी क्षयरोगी कृतः जलनिधिस्तु क्षारः कृतः बिडौजाः शक्रः भगी सहस्रभगयुक्तः यैरैश्वरं लिङ्गं पातितं मधुरिपुस्तिर्यक्षु मत्स्यकच्छपादिषु पातितः यमः शौद्रे शूद्रत्वे पातितः यैः प्रमत्तो नहुषः स्वर्गाद्विनिपातितः गिरेति सर्वत्र सम्बध्यते यैः दिव्याः उरगाः शुचौ वह्नौ हुताः किल प्रसिद्धाः ते ब्राह्मणाः वः युष्मान् पान्तु संरक्षयन्तु ।।

In Public domain. Digitization Muthulakshmi Research Academy

अगस्त्यः

पौलोमीधवहस्तमुक्तभिदुरक्षत्यज्ञसर्वाङ्गको
मैनाको जठरेऽस्ति यस्य मणिवद्रत्नाकरस्य प्रभोः।
येनासौ चुलुके निधाय मुनिना गम्भीरतोयः पपे
साक्षाच्छम्भुरिवापरः स भगवान्कुम्भोद्भवः पातु वः।। {57}

।।पौलोमीति।। पौलोमीपतेः शचीपतेः हस्तान्मुक्तं यद्भिदुरं वज्रं तस्य क्षत्यज्ञानिप्रहारानभिज्ञानि सर्वाङ्गानि यस्य सः मैनाकः यस्य प्रभोः रत्नाकरस्य जठरे मणिवदस्ति मणिवतो रत्नाकरस्येति वा येन मुनिना गम्भीरतोयः अगाधजलधरः असौ रत्नाकरः चुलुके करसम्पुटे निधाय पपे पीतः साक्षादपरः शम्भुरिव स्थितः स भगवान्कुम्भोद्भवोऽगस्त्यः वः पातु।

नारदः

मध्याह्नद्युमणिद्युतिर्विधुरिव प्रह्लाददः प्रेक्षतां
कालाग्निस्तपसाऽपरो जनदृशां कर्पूर पूर प्रभः।
अद्धा शम्भुरभालदृक् द्विसुभुजो विष्णुः परो विश्वसृक्
साक्षादेकमुखः सपर्वतमुनिः पायात्सवो नारदः ।। {58}

।।मध्याह्नेति।। मध्याह्नसूर्यदीप्तिरपि प्रेक्षतां पश्यतां विधुरिव प्रह्लाददः आनन्ददः तपसाऽपरः कालाग्निरपि जनदृशां कर्पूरपूरप्रभः कर्पूरप्रभासदृशः अद्धा साक्षाच्छम्भुःपरं त्वभालदृक् परोऽन्यो विष्णुरपि द्वौ सुभुजौ यस्य स द्विसुभुजः साक्षाद्विश्वसृक् ब्रह्माऽपि एकमुखः पर्वतमुनिना सह वर्तत इति

In Public domain. Digitization Muthulakshmi Research Academy

भृगुः

चिन्हं यस्य पदाम्बुजस्य विलसत् ब्रह्माण्डनाथोरसि
व्यक्तं राजति कौस्तुभस्य सविधे लक्ष्म्या परं लालितम् ।
यः साक्षादिव वेदमूर्तिरपरो जाज्वल्यमानोऽर्चिषा
युष्माकं कृतवीर्यसून्वरिगुरुर्भद्रं स दिश्यात्कविः।। {59}

इति ब्राह्मणाः

।।चिन्हमिति।। विलसत् शोभमानं कौस्तुभस्य सविधे समीपे व्यक्तं परं लक्ष्म्या लालितं यस्य कवेः पदाम्बुजस्य चिन्हं भृगुलत्तेति प्रसिद्धं ब्रह्माण्डनाथोरसि राजति शोभते यः कविः साक्षादपरो. वेदमूर्तिरिव स्थितः अर्चिषा जाज्वल्यमानः कृतवीर्यसूनुः कार्तवीर्यः तस्यारिः परशुरामः तस्य गुरुः वृद्धप्रपितामहात्वात्सः कविर्भृगुः युष्माकं भद्रं कल्यणं दिश्याद्ददातु ।

अथ पुरुषार्थाः

कामः

कमलभूकमलापतिकामलाः कमलबन्धुशुचो कमलानुजः।
कमलधिः कमलावरदेवरः कमलवाहनकुण्डलमित्रकौ।। {60}

।।कमलेति।। पञ्चभिः कुलकं कमलभूर्ब्रह्मा कमलपतिर्विष्णुः कमले जले भवाः कामलाः जलंधरादयः "सलिलं कमलं जलमि"त्यमरः एते

In Public domain. Digitization Muthulakshmi Research Academy
कमलबन्धुः सूर्यः शुचिरग्निस्तौ च कमलायाः लक्ष्म्याः अनुजश्चन्द्रः कमलधिर्जलधिर्वरुणः कमलायाः वरः श्रेष्ठः देवरः शक्रः कमलः कुरङ्गः वाहनं यस्य सः कमलवाहनो वायुः "स्यात्कुरङ्गेऽपिकमल" इत्यमरः कुण्डलः कुबेरस्तस्य प्रशस्तं मित्रं मित्रकः शिवस्तौ च "कुबेरे चैव कुण्डल" इत्यमरः एते सर्वे अन्येषां तु कैमुत्यन्यायेन ।।

कमलशालिमुखैः कमलेक्षणैः सकमलामलमालागलैः कलैः।
कलकलध्वनिकृत्कलमेखलैः कनककुण्डलमण्डितगण्डकैः।। **{61}**

।।**कमलशालीति**।। कमलवत् शालि शोभमानं मुखं येषां तैः कमलेक्षणैः स्पष्टमेतत् कमलसहिता निर्मला माला गले येषां तैः सकमलामल–मालागलैः कलैः सुन्दरैः कलकलेति ध्वनिकृत् कला मनोहरामेखला येषां तैः कनककुण्डलमण्डितगण्डकैः सुवर्णकुण्डलालङ्कृत कपोलैः ।

करपदैः कमलैर्मणिमण्डितैररुणवस्त्रयुगैश्च मनोहरैः।
अलकमौक्तिकचञ्चलसुन्दरैः स्मितयुतैर्वदनैः स्मरसायकैः ।। **{62}**

।।**करेति**।।मणिमण्डितैः करपदैः कमलभूतैः मनोहरैररुणवस्त्रयुगैश्चालक-मौक्तिकचञ्चलसुन्दरैः स्मितयुतैः स्मरसायकैः काम बाणैर्वदनैर्मुखैश्चो-पलक्षिताः।।

ललितसङ्कुचिताक्षिमनोहरैर्मधुरवाग्जितकोकिलकूजितैः।
हृदयतद्वलितैः सुविशेषकैर्गलितवाडवशान्तरसव्रतैः।।**{63}**

।।**ललितेति**।। ललिताभ्यां सङ्कुचिताक्षिभ्यां मनोहरैः मधुरया वाचा जितं कोकिलानां कूजितं यैस्तैः हृदयहृतमनोहारिवलितमङ्गमोटनादिकं येषां तैः

In Public domain. Digitization Muthulakshmi Research Academy

शोभनो विशेषको येषां तैः तमालपत्रतिलकं चित्रकाणि विशेषकमित्यमरः गलितानि वाडवानां ब्राह्मणानां शान्तरसो व्रतानि च यैस्तैः ।।

मुनिमनोऽतिहरैर्वनिताजनैर्मनसिजेन च येन वशीकृताः ।
सकमलातनयः प्रभुरीशितात्रिजगतां ददतां भवतां मुदम्।। {64}

।।मुनीति।।। मुनीनां मनांसि अतिशयेन हरन्तीति तथोक्तास्तै- र्वनिताजनैः कृत्वा येन मनसिजेन कामेन च पूर्वोक्ताः ब्रह्मादयो वशीकृताः सकमला - तनयः रुक्मिणीसुतः प्रभुः समर्थस्त्रिजगतामीशिता ईश्वरः मनसिजः भवतां मुदं हर्षं ददताम् । इति पञ्चभिः श्लोकैः कुलकमुक्तम् ।

देहे सुधा चान्द्रशलाकिका दृशो-
र्मिथः सखी मन्त्रिरये रतौ प्रिया।
स्वर्गापवर्गौ वनितासुतैः प्रदा
देवैः प्रदत्ता मुदमातनोतु वः।। {65}

।।देहेति।। देहे शरीरे लग्ना सती सुधाऽमृतप्राया दृशोश्चान्द्रशला- किका कर्पूरशलाकिका मिथो रहसि सखी एति प्राप्नोतीत्ययो गृहं तस्मिन् अये शुभकर्मणि इति वा मन्त्रप्रदारतौ सम्भोगे प्रियासुतैः पुत्रैः कृत्वा स्वर्गापवर्गौ प्रदा देवैरर्यमादिभिः प्रदत्ताभगो अर्यमा सविता पुरन्ध्रिर्मह्यं त्वादुर्गार्हपत्यायदेवा इति श्रुतेः वनिता पुरन्ध्रिर्वो युष्माकं मुदं हर्षमातनोतु विस्तारयतु ।।

दिगम्बरःपांसुविधूसराङ्गो
जटाधरो वीतभयो विलज्जः।
लीलारुचिर्मातृगणैः परीतो

In Public domain. Digitization Muthulakshmi Research Academy

मुदं तनोत्वीश इवार्भको वः।।{66}

।।दिगम्बर इति ।। उभयत्र सप्तविशेषणानि । इति कामः तृतीयपुरुषार्थ इति भावः।।

धर्मः

ते धन्यास्तर्कशास्त्राभ्यसनपरिरता व्याकृतौ ये च दक्षा
मीमांसावेदिनो ये श्रुतिनिवहभृतो विश्वमेतद्दधन्ते ।
काव्यालङ्कारविज्ञा रसरुचिरपदैर्दुःखितान्हर्षयन्ति
सांख्याः प्राभाकराद्या भुवि नरमिषतो देवतास्तान्नमामः।।{67}

।।तेति।। ये तर्कशास्त्राभ्यसने परिरतास्ते धन्याः व्याकृतौ व्याकरणे ये दक्षा निपुणास्ते च धन्याः, श्रुतिनिवहभृतोवेदसमूहधराः ये मीमांसावेदिनः मीमांसाशास्त्रज्ञास्ते एतद्विश्वं दधन्ते काव्यालङ्कारविज्ञाः रसैः शृङ्गारादिभिः रुचिरैर्मनोज्ञैः पदैः वाक्यैः दुःखितान् हर्षयन्ति सांख्याः सांख्यशास्त्रज्ञाः प्राभाकराद्याः भुवि भूमौ नरमिषतो मनुष्यव्याजात् देवतान्सर्वान् नमामः ।।

व्यर्थं नैयायकास्ते घटपटमठतां शाब्दिकाठग्ठज्ञेयम्
तद्वन्मीमांसका ये जगदिदमहरं कर्मजन्यं वदन्ति ।
शून्यं वेदान्तिनस्ते जगदहह वृथा वादिनोऽन्येऽनभिज्ञाः
शास्त्राण्यालोढ्य सर्वे वयमिहपुणारामनाम स्मरामः।। {68}

In Public domain. Digitization Muthulakshmi Research Academy

।।व्यर्थमिति।। नैयायिकाः घटत्वं पटतामठतामेवं व्यर्थं वदन्ति शाब्दिकाः वैयाकरणाः ठक्स्यात् ठच् स्यात् एयादेशः स्यादित्येवं वदन्ति तद्वद्ये मीमांसकास्ति जगदिदमहरं नास्ति हरो यस्मिन् तदहरमनीश्वरं किन्तु कर्मजन्यं वदन्ति वेदान्तिनस्तु जगच्छून्यं वदन्ति, अहहेति खेदे अन्ये प्राभाकरवैशेषिकाद्याः अनभिज्ञाः वृथावादिनो भवन्ति वयं तु सर्वे शास्त्रण्यालोढ्येह शास्त्रेषु निपुणाः रामनाम स्मरामः ।।

दुर्भाग्यैः कविभिर्मृगो हगधरश्रोणीकुचाक्षिभ्रुवम्
भूपानां तु दुरात्मनां कुचरितं प्रोद्वर्ण्यते गौरवात् ।
अस्माभिस्तु मुनीन्द्रगौतमवधूशापप्रमोचावहम्
श्रीरामस्य परात्मनो मुनिधृतं पादाम्बुजं वर्ण्यते ।। {69}

।।दुर्भाग्यैरिति।।कुचाक्षिभ्रुवम् अचतुरेत्यादिना अजन्तोनिपातः प्राण्यङ्गत्वादेकवद्भावः गौरवाद्गौरवमाश्रित्य शापप्रमोचमावहति प्रापयतीति स्पष्टमन्यत् ।।

अल्पाहहाधररसं कफपित्तयुक्त-
मेणीदृशाममृतशंसिधियः पिबन्ति ।
मोक्षे निबद्धमनसः कमलात्तशेष-
मेते वयं हरिपदाब्जरसं पिबामः।। {70}

।।अल्प इति ।। अहहेति खेदे अमृतमिति शंसिधीर्येषां ते ।

कुचान्तरे कुंकुमभूषणाढ्ये मृगीदृशां शेरत एव मन्दाः।
भागीरथी रोधसि सन्निविष्टाः श्रीरामरामेति वयं वदामः।। {71}

In Public domain. Digitization Muthulakshmi Research Academy

।। कुचान्तरे।। इति स्पष्टार्थः ।

दग्धस्य कुक्षेर्भरणाय बालिशा
नमन्ति मूढान्हतचेतसः खलान् ।
अमी तु सन्तोषसुवृत्तयो वयम्
प्रभुं नमामोऽच्युतयेऽच्युतं सदा।। {72}

।।दग्धस्येति।। शिशावज्ञे च बालिशइत्यमरः अच्युतये अपुनर्निवर्तनाय प्रभुं नमाम इत्युक्तं तदेवाह दग्धस्येति।।

शम्भुदत्तनिजशक्तये गवां लक्षरक्षणविचारणायते।
कृष्णलेखरिपुकोटिनाशिने सूनुसूनुसुतसूनवे नमः।। {73}

।शम्भ्विति।। शम्भवे शिवाय दत्तानिजास्वकीया यशोदोदरसम्भवा शक्तिर्येन तस्मै अन्यत्र शम्भुना दत्तानि जाशक्तिरायुधविशेषो यस्मै तस्मै गवां लक्षं सङ्ख्यातत्करणे विचक्षणायेत्युभयत्राऽर्जुनेनापि विराटनगरे कौरवान्विजित्य गावो रक्षिता इति प्रसिद्धिः लेखानां देवानां रिपुकोटिनाशिने इत्युभयत्र सूनुः सूर्यः ससूनुर्यस्य सः सुनुसूनुः कश्यपस्तस्य सुतस्त्विन्द्रस्तस्य सूनवेऽनुजायोपेन्द्रेकश्यपात्मजेपीन्द्रानुजत्वेन प्रसिद्धिः अन्यत्र सूनोः सूर्यस्य सूनुर्धर्मराजो यमस्तस्य सुतो युधिष्ठिरस्तस्य सूनवेऽनुजाय सूनुः पुत्रेऽनुजे रवावितिविश्वः, हे कृष्ण हे अर्जुन बीभत्सुर्विजयी कृष्णः सव्यसाचीधनञ्जय इत्यभिधानात् ते तुभ्यं नमः।।

क्षीरजावरिगदे च बिभ्रते क्षीरजाप्ततमबिंबवर्तिने ।
क्षीरजाक्षघृतजासनाय ते केशवंदितपदे नमो नमः।।{74}

In Public domain. Digitization Muthulakshmi Research Academy

।।क्षीरजाविति।।क्षीरजौ पद्मशङ्खौ क्षीरमप्सु चेत्यमरः अरश्चक्रकीलकस्तद्वत् यत् तत् अरिचक्रं च ते अरिगदे च बिभ्रते क्षीरजानां कमलानामाप्ततमः सूर्यस्तस्य बिम्बवर्तिने घृतजं कमलमासनं यस्य तस्मै "त्रिष्वप्सु च घृतामृते"त्यमरः को ब्रह्मा ईशः शिवस्ताभ्यां वन्दितचरणाय हे क्षीरजाक्ष पुण्डरीकाक्ष ते तुभ्यं नमो नमः।।

विश्वम्भराभृत्तनयापतिप्रथमभूषणद्वेषणपत्रिपत्रिणे ।
रसाम्बरोत्कृष्टसुतोरुवक्षसे काशेन शायिन्करवाणि ते नमः।। {75}

।।विश्वमिति।। विश्वम्भरा भृत् भूभृत् तस्य तनया पार्वती तस्याः पतिः शिवस्तस्य प्रथमभूषणानि प्रसिद्धाभरणानि सर्पास्तेषां द्वेषिणः शत्रुः स चासौ पत्री पक्षी गरुडः सः पत्रं वाहनमस्यास्तीति द्वेषणपत्रिपत्री तस्मै द्वेषणपत्रिपत्रिणे गरुडवाहनाय"पत्रं वाहनपक्षयो"रित्यमरः रसाया भूमेरम्बरं वस्त्रं समुद्रस्तस्योत्कृष्टसुता लक्ष्मीः ज्येष्ठादयो निकृष्टाः सा उरुणि विशाले वक्षसि यस्य तस्मै कं वायुमश्नन्तीति काशाः सर्पास्तेषामिनः प्रभुः शेषनागः तत्र शयितुं शीलं यस्य तत्सम्बुद्धौ हे काशेन शायिन् हे शेषशायिन् ते तुभ्यमहं नमः करवाणि कुर्याम् ।।

विषदवाहविषाद्विषजासनैर्विषधिपाविषहेन विषापहैः।
विषमयेन दृशो विषजाक्ष ते विषधरेन शयाय नमो नमः।। {76}

।।विषदेति।। विषदो जलदः पुम्भावे तत्क्रियायां च "पौरुषं विषमप्सु" चेत्यमरः वाहो वाहनं यस्य सः विषदवाहः शक्रः तुराषाण्मेघवाहन इत्यमरः

In Public domain. Digitization Muthulakshmi Research Academy

विषमत्तीति विषात्शिवः विषजासनः कमलासनः ब्रह्मा विषधिर्जलधिस्तं पिबतीति विषधिपाः अगस्त्यस्तेन विषधिपा आतोधातोरित्यालोपः विषं हन्तीति शोषयतीति विषापहो वायुस्तेन विषापहैः सूर्यगरुडादिभिः नमस्कृतायेति शेषः विषमयो जलमयश्चन्द्रः इनः सूर्यस्तौ दृशौ यस्य तस्मै विषधराणाम् सर्पाणां इनः प्रभुः शेषस्तत्र शयाय हे विषजाक्ष हे पुण्डरीकाक्ष ते तुभ्यं नमो नमः।।

अमृतसिन्धुसुतामृतदृष्टयेह्यमृतमुक्सदृशाकृतये च ते ।
अमृतजाक्ष निशानिभवाससे ह्यमृततां ददतेऽज नमो नमः।।{77}

।।अमृतेति।। अमृतोत्पत्तिर्यस्मिन्नित्यमृतसिन्धुः अमृतानां क्षीराणां सिन्धुरिति वातस्य सुता लक्ष्मीस्तस्याऽमृतमयी दृष्टिर्यस्मिन् अमृतसिन्धुसुता-याममृतमयी दृष्टिर्यस्येति वा तस्मै अमृतमुक्जलमुक् "त्रिष्वप्सु च घृतामृते"त्यमरः तत्सदृशाकृत ये मेघश्यामाय निशा हरिद्रातत्संनिभं वासो यस्य तस्मै पीताम्बराय निशाख्या काञ्चनी पीता हरिद्रा वरवर्णिनीत्यमरः अमृततामममृतत्वं मोक्षं ददते दात्रे हे अमृतजाक्ष हे अज ते तुभ्यं नमो नमः।।

वनजरूपधराय नमो नमो द्विजसुरूपधराय नमो नमः।
क्षितिपरूपधराय नमो नमः कलिविलोपकृतेऽज नमो नमः।।{78}

।।वनेति।। वनजौ जलजौ मत्स्यकूर्मौ वनजौ काननजौ वराहनृसिंहौ च "वनं सलिलकानने" इत्यमरः तेषां मत्स्यकूर्मवराहनृसिंहानां रूपधराय द्विजयोः वामनपरशुरामयोः ब्राह्मणयोः सुरूपधराय क्षितिपानां राज्ञां

In Public domain. Digitization Muthulakshmi Research Academy

श्रीरामबलभद्रकृष्णानां रूपधराय हे अज हे विष्णो कलिविलोपकृते कल्किरूपाय च ते नमो नमः।।

कृष्णाम्बरीषार्तिहराय विष्णवे गजेन्द्ररुक्माङ्गदभीतिवारिणे ।
आत्रेयभीतार्जुनपूर्वजन्मनो निर्भीतिदायाच्युत ते नमो नमः ।। {79}

।।कृष्णेति।। कृष्णा द्रौपदी अम्बरीषो भूपतिस्तयोरार्तिहराय गजेन्द्र-रुक्माङ्गदयोर्भयनिवारणाय आत्रेयो दुर्वासस्तस्मात् भीतस्यार्जुन पूर्वजन्मनो युधिष्ठिरस्य निर्भीतिदायाभयप्रदाय हे अच्युत! ते तुभ्यं विष्णवे व्यापकाय नमो नमः।। इति धर्मः प्रथमपुरुषार्थ इति भावः।

अर्थः

घृतजबन्धुजशत्रुपरिग्रहं
विवसनं वसनैरमितैर्हरिः।
सदसि विह्वलमेत्य जुगोप य
स्तमिह नौमि करिष्यति किं यमः।। {80}

।।घृतमिति।। घृतं जलं तज्जं पद्मं तद्बन्धुः सूर्यस्तज्जः कर्णस्तस्य शत्रुरर्जुनस्तस्य परिग्रहो भार्या द्रौपदी "पत्नी परिजनादानमूलशापाः परिग्रह" इत्यमरः। तं विवसनं नग्नं सदसि सभायां विह्वलं व्याकुलमेत्य मानसागत्य यो हरिरमितैर्वसनैर्जुगोपाच्छादयामास तमिह नौमि अतो मां यमः किं करिष्यति न किमपीति भावः।।

तुरगशत्रुमुरारिनिषूदनो प्रियतमो प्रियदङ्घ्रिजजीवनम् ।
धरति कं शरणं तमिहैमि किं बत करिष्यति मां यमुनाऽनुजः।। {81}

In Public domain. Digitization Muthulakshmi Research Academy

।।तुरगेति।। तुरगशत्रुर्महिषः तच्चासौ सुरारिरसुरः महिषासुरः तस्य निषूदनी निहंत्री तस्याः प्रियतमोऽपि शिवोऽपि यस्याङ्घ्रिजं जीवनं जलं गङ्गामित्यर्थः के मस्तके धरति तमिह शरणमेमि प्राप्नोमि बतेति हर्षे यमुनाऽनुजा यस्य सः यमः मां किङ्करिष्यति।।

नयनपादशिलात्मपरिग्रहः स्वतनुमैच्चयदङ्घ्रिगपांसुना ।
तमवनेस्तनयासुहृदं भजे तरणिनन्दनदूतवशः क्व मे ।। {82}

।।नयनेति।। नयने नेत्रे पादयोर्यस्येति नयनपादो गौतमः तस्य शिलात्मा शिलादेहः यः परिग्रहः भार्या अहल्या यस्याङ्घ्रिगतपांसुना रजसा स्वतनुं स्व शरीरं ऐत प्राप इण् धातोर्लङोरूपं चेति पूरणे अवनेस्तनया सीता तस्याः सुहृदं तं श्रीरामं भजे तरणिनन्दनो यमस्तस्य दूतवशः मे मम क्व नास्तीत्यर्थः।।

मुदिरनादपितुः शिरसां ततिर्दशदिगीशमुदे शरखण्डिता।
व्यरचि येन तता भुवि तं भजे दिनकरात्मजकिङ्करभीः क्व मे ।।{83}

।।मुदिरेति।। येन रामेण मुदिरनादो मेघनादस्तस्य पितुः रावणस्य शिरैः खण्डिता शिरसां ततिः पङ्क्तिः दशदिगीशानां मुदे भुवि तता विस्तृता व्यरचि रचिता तं श्रीरामं भजे दिनकरात्मजस्य किङ्करेभ्यः भीर्भयं मे क्व नास्तीत्यर्थः।।

रथपदावृतदक्षिणलोचनः कुरुनृपावरजाधवमस्तकम् ।
विजयिना निरकृन्तयदच्युतस्तमभजं भज मां यमकिङ्करः।। {84}

।।रथेति।। रथपदा रथचरणेन चक्रेणेत्यर्थः, आवृतमाच्छादितं दक्षिणलोचनं सूर्यो येन सः योऽच्युतः कुरुनृपस्य दुर्योधनस्य अवरजा अनुजा तस्याः धवो

In Public domain. Digitization Muthulakshmi Research Academy

।।रथेति।। रथपदा रथचरणेन चक्रेणेत्यर्थः, आवृतमाच्छादितं दक्षिणलोचनं सूर्यो येन सः योऽच्युतः कुरुनृपस्य दुर्योधनस्य अवरजा अनुजा तस्याः धवो जयद्रथस्तस्य मस्तकं विजयिनाऽर्जुनेन निरकृन्तयत् छेदस्यति स्म तमच्युतमहमभजं भजनं कृतवानस्मि, हे यमकिङ्कर! त्वमपि मां भज बन्धनताडनादिकं तु दूरे स्थितं यथा हरिः पूज्यस्तद्भक्ताश्चेति स्मरणात् त्वमपि मां भजेति भावः।।

प्रथमसृष्टिशयः प्रथमासुरौ प्रथमधातृभयङ्करविग्रहौ ।
हरिरहन्निव मत्कुणजन्तुकौतमभजं श्रयमामि ननन्दन।।{85}

।।प्रथमेति।। प्रथमसृष्टयः आपः तासु शेते इति प्रथमसृष्टिशयः जलशायी यो हरिः प्रथमस्य धातुराद्यस्य ब्रह्मणः भयङ्करविग्रहौ भयजनकशरीरौ प्रथमासुरौ मधुकैटभौ मत्कुणजन्तुकाविव कालेऽप्यजातदन्ते च "शय्याजन्तौ च मत्कुण" इति वैजयन्तिः अहन् हन्ति स्म हतेर्लङोरूपं तं हरिमहमजं भजनं कृतवानस्मि हहेन नन्दनहेयमत्वं मां श्रियमदाश्रितो भव महतां सेवकः परेषामप्याश्रयभूतो भवति ।।

विजयसूनुपरिग्रहगर्भगोधृतसुदर्शनहेतिरनुत्तमः।
यम ररक्ष परीक्षितमच्युतस्तमगमं शरणं शरणं व्रज।।{86}

।।विजयीति।। विजयस्यार्जुनस्य सूनुरभिमन्युस्तस्य परिग्रहो भार्या उत्तरा तस्या गर्भगोधृतसुदर्शनहेतिर्धृतचक्रायुधः नास्ति उत्तमो यस्मादित्यनुत्तमः योऽच्युतः परीक्षितं ररक्ष तमहं शरणमगमं गतवानस्मि हे यम! त्वं शरणं गृहं व्रज गच्छ "शरणं गृहरक्षित्रो"रित्यमरः श्रीमद्भागवते परीक्षितः एवमेव

In Public domain. Digitization Muthulakshmi Research Academy

रक्षणं कृतमिति द्रौण्यस्त्रविपुष्टमिदं मदङ्गं सन्तानबीजं कुरुपाण्डवानां जुगोप कुक्षिं गत आत्तचक्रो मातुश्चमेयः शरणं गताया इति ।।

बहु वदामि वृकोदर किं नु ते मम हरेरुभयोरपि नान्तरम् ।
कुशधिभङ्गविलासविशेषयोस्त्वमपयाहि कृतोऽयकमञ्जलिः।। {87}

।।**बह्विति**।। हे वृकोदर! हे यम! ते बहु किं वदामि मम च हरेश्चोभयोरप्यन्तरं तारतम्यं नास्त्येव कथम्भूतयोरुभयोः कुशधिर्जलधिर्भङ्गस्तरङ्गस्तयोर्विलासस्तद्विशेषयोः यथा समुद्रतरङ्गयोरभेदस्तद्वत्तद्विशिष्टयोरित्यर्थः त्वमपयाहि परिवृत्त्य गच्छ अयमञ्जलिर्मया कृतः अयमेवायकं अव्ययसर्वनाम्नामकच् प्राक्टेरित्यकच्प्रत्ययः ।

कमलसम्भवबन्धुज वारणं
पठति योऽष्टकमेतदहर्मुखे ।
क्षयमिनात्मभवस्य सनैतितद्
व्रजति हारसुधामयतीप्सितम् ।।{88}

।।**कमलेति**।। कमलं जलं "सलिलं कमलं जल"मित्यमरः तत्र सम्भवं पद्मं तद्बन्धुः सूर्यस्तस्माज्जातो यमः तस्य वारणं यमनिवारणमेतदष्टकं यो भक्तः अहर्मुखे प्रभाते पठति स इनस्य सूर्यस्यात्मभवो यमः तस्य क्षयं गृहं "निलयापचयौ क्षया"वित्यमरः नैति न प्राप्नोति यतिभिर्योगीश्वरैरीप्सितं प्रसिद्धं हरेरिदं हारं हारं च तत् शोभनं धाम हारसुधामवैकुण्ठं धाम व्रजति गच्छति इत्यर्थः । इति द्वितीयः पुरुषार्थ इति भावः।।

In Public domain. Digitization Muthulakshmi Research Academy

मोक्षः

पारावारनिमग्नदैत्यजठरक्रोडप्रलीनश्रुति
व्यानीतार्पितनारदादिविबुधैः प्रस्तूयमानोद्धवम् ।
अम्भक्षोभनिपीडीताप्पतिसरिद्भ्यारब्धदिव्यस्तुतिं
श्रीवत्साङ्कमहं व्रजामि शरणं श्रीमत्स्यमूर्तिं हरिम् ।। {89}

।।परेति।। पारावारे समुद्रे निमग्नदैत्यस्य जठरक्रोडिकुक्षिमध्ये प्रलीनां श्रुतयः वेदा आदौ व्यानीताः पश्चादर्पिता येभ्यस्ते च नारदादयः प्रजापतयः विबुधाः शक्रादयस्तैः प्रकर्षेण स्तूयमानः उद्धवः उत्सवो यस्य तं स्तूयमानेनोध्दवो यस्येति वा स्तूयमानानामुत्कृष्टं धवति वा अम्भसां क्षोभेन निपीडितोयोऽप्पतिः समुद्रस्तेन सरिद्भिस्तत्पत्नीभिश्च भिया भयेनारब्धा दिव्याऽस्तुतिर्यस्य तं श्रीवत्साङ्कं मत्स्यमूर्तिमहं शरणं व्रजामि गच्छामि ।।

सहस्रकोटीशतकोटिताधिक
स्वपृष्टसंरोपितनागवद्धरम् ।
आम्नायशास्त्रापवनं सुरर्षभं
तं कूर्ममाद्यं शरणं गतोऽस्म्यहम् ।। {90}

।।सहस्रेति।। सहस्रकोटिवज्राधिकस्वपृष्टे संरोपिता नागवतो सशेषनागधरा भूमिर्येन तम् अन्यत्र कुण्डलकङ्कणहारादिभूतनावान् हरः शिवो येन तं आम्नायाः शास्त्राणि चापवनाः अङ्गानि यस्य तं सुरर्षभं देवश्रेष्ठं अन्यत्र

In Public domain. Digitization Muthulakshmi Research Academy

सुरस्य शिवस्य ऋषभं नन्दिनम् आद्यं कूर्ममहं शरणं गतोऽस्मि नन्दिपक्षे कूर्म्मवत् माद्यत इति कूर्ममाद्यम् ।।

दन्तीन्द्रचर्माम्बरशम्भुदेह प्रस्वेदतोयप्रभवारधात्री ।

संक्रन्दनास्त्रप्रहरप्रभीत मैनाकसंरक्षकवारिमग्ना।। {91}

ततश्च वै भारतयूथमुख्यैः प्रत्यर्पितक्ष्मेन च येन उध्दृता ।

रदाग्रलग्नैव च लोकधात्रीं तं यज्ञकोलं शरणं प्रपद्ये ।। {92}

।।दन्तीन्द्रेति।। युग्मेनाह भारतानां काकोदराणां नागानां यूथमुख्यैः शेषवासुकिप्रभृतिभिः प्रत्यर्पिता क्ष्मा भूमिर्यस्मै ते नयेन यज्ञकोलेन दन्तीन्द्रचर्मेत्यनेनोष्णत्वं व्यज्यते गजराजचर्माम्बरस्य शम्भोर्देहस्य प्रस्वेदतो या प्रभवस्योत्पन्नस्य मङ्गलस्य धात्री जननी संक्रन्दनास्त्रस्येन्द्रवज्रस्य प्रहारस्ताडनं हरतेरनुद्यमनेजिति त्वच्प्रत्ययः अनेन शक्रस्य पर्वतचूर्णीकरणमकिञ्चित्करत्वं सूचितं तस्मात् प्रभीतस्य मैनाकस्य संरक्षकः समुद्रस्तस्य वारिणि मग्नारदाग्रे दंष्ट्राग्रे लग्ना लोकधात्री लोकमाता धात्री भूमिरुद्धृता तं यज्ञकोलं यज्ञवराहं शरणं प्रपद्ये इति युग्मम्।

वाहारिदैत्यद्विषतीपतिं यः कोशारिरूपं हतमात्तचक्रः।

ररक्ष दक्षारिजितं विपत्घ्नं न्नर्त्धश्चपञ्चास्यमजं प्रपद्ये ।। {93}

।।वाहेति।। हतमातृचक्रःप्रमथितमातृमण्डलः मातृचक्रप्रमथनो महामातृ-गणेश्वर इति पाद्मे, यो नृसिंहवाहो श्वस्तस्यारिर्महिषः स चासौ दैत्यः महिषासुरस्तस्य द्विषती वैरिणी पार्वती तस्याः पतिं शिवं कीशो वानरः सोऽरिर्यस्य सः कीशारिर्मेषस्तद्रूपं ररक्ष तं दक्षारिर्वीरभद्रस्तं जयतीति तथोक्तं विपदं हन्तीति विपत्घ्नं स्तं पञ्चास्यः सिंहस्तद्रूपमजं विष्णुं शरणं

In Public domain. Digitization Muthulakshmi Research Academy

प्रपद्ये कीदृशं पञ्चास्यं नुः पुरषस्यार्द्धयस्येतिन्नर्द्धस्तं नृसिंहमित्यर्थः "मेषरूपशिवत्राता दुष्टशक्तिसहस्रभुक्। अनन्तायुतदोर्दण्डनृसिंहो वीरभद्रजित्।।" इति पाद्मे अयं श्लोकःशिवपक्षेऽपि योज्यः तद्यथा हतमातृचक्रः अनुसृतमातृमण्डलः हनहिंसागत्योः यः पञ्चास्यः दक्षारिजितं नृसिंहं ररक्ष तं पञ्चास्यं पञ्चवक्रमजं शिवं शरणं प्रपद्ये कीदृशं पञ्चास्यं नुः पुरुषस्यार्ध्दं यस्य सः न्नर्धः तमर्द्धनारीश्वरमित्यर्थः अन्यद्विशेषणत्रयमपि पञ्चवक्त्रे योज्यं पुरा किल भगवान्शिवः सिंहवैरिणा शरभरूपेण नृसिंहेन साध्र्दयुद्धं कृत्वा तस्मादपावर्तत इति स्कान्दे ।

पादन्यासपवित्रितत्रिभुवनं गृह्णन्तमिद्धं बलिम्
लोकेष्टं हरितः करैर्दशशतैर्व्याप्य स्थितं लीलया ।
उत्पाद्येहमहाधुनीं त्रिजगतीं संशोध्यमानं सदा
तं श्रीविष्णुमुरुक्रमं च शरणं नित्यं प्रपद्यामहे ।।{94}

।।पादेति।। पादन्यासेन चरणन्यासेनान्यत्र किरणप्रसारेण पवित्रितं त्रिभुवनं येन इद्धमुग्रं बलिं विरोचनं गृण्हन्तं निगृहीतारं लोकैरिष्टं पूजितमन्यत्र लोकैः संध्यामुपासद्भिरिष्टं दत्तं बलिं पूजां गृह्णन्तमिद्धं दीप्तिं दशशतैः सहस्रकरैः अन्यत्र दशहरितः दशदिशो लीलया व्याप्य स्थितम् इह जगति महाधुनीं गङ्गामन्यत्र यमुनामुत्पाद्य त्रिजगतीं सदा संशोध्यमानं तमुरुक्रमं त्रिविक्रमं विष्णुमन्यत्रोरुर्महाक्रमो गमो यस्य तं श्रीविष्णुं सूर्यं च योजनानां सहस्रे द्वे द्वे शते द्वे च योजने एकेन निमिषार्द्धेन गंच्छत् भानो नमोऽस्तु ते इति स्कान्दे, नित्यं शरणं प्रपद्यामहे ।।

In Public domain. Digitization Muthulakshmi Research Academy

वृषाकपिप्राप्तसुमन्त्रदक्षो भूभृत्कुलघ्नोऽर्जुनशक्तिकृद्यः।

धरामरस्थानमचीकरत्तं प्रभुं मुराणां च भुवः प्रपद्ये ॥{95}

।।**वृषेति**।। वृषाकपेः शिवात्प्राप्तेन शोभनमन्त्रेण दक्षो निपुणो भार्गवो रामो हि शिवादस्त्रमन्त्राण्यधीतवानिति प्रसिद्धिः अन्यत्र वृषाकपेरुपेन्द्रात् प्राप्तैः सुमन्त्रैः सामादिभिर्दक्षः"हरविष्णूवृषाकपी"त्यमरः तथा भूभृतां राज्ञा-मन्यत्र पर्वतानां कुलं समूहं हन्तीति तथोक्तः अर्जुनस्य कार्तवीर्यस्य यथा शक्तिं सामर्थ्यं कृन्ततीति नाशयतीति तथोक्तः, अन्यत्रार्जुनस्य पार्थस्य स्वसुतस्य शक्तिं सामर्थ्यमायुधं च करोतिततिथायः धरामराणां ब्राह्मणानामन्यत्र धराणां पर्वतानाममराणां देवानामास्था नंस्छितिं मर्यादामचीकरच्चकार तं भुवो भूमेः सुराणां ब्राह्मणानां प्रभुं परशुराममन्यत्र सुराणां भुवः स्थानस्य स्वर्गस्य प्रभुमिन्द्रं च शरणं प्रपद्ये ।

स्वः सद्धुनी मौलिसुमालशक्तेर्भ्रातुः शरण्यं कुभृतां सहस्रैः।

बबन्ध वार्द्धिनिमिषेण यस्तं क्षोण्यात्मजात्हृद्यमजं प्रपद्ये।।{96}

।।**स्वरिति**।। यो रामः कुभृतां भूभृतां सहस्रैः स्वः स्वर्गे सीदन्ति पर्यटन्तीति स्वः सदो देवास्तेषां धुनी गङ्गा सा मौलौ शोभनमाला यस्य सः स्वः सनद्धुनी मौलिसुमालः शिवस्तस्य शक्तेर्भवान्या भ्रातुर्मैनाकस्य शरण्यं वार्ध्दि जलधिं निमिषेण बबन्ध, तं क्षोण्यात्मजायाः हृद्यं हृदयप्रियं हृदयस्य प्रिय इति यत्प्रत्ययः हृदयस्य हृदिति हृदादेशश्च श्रीराममजं विष्णुं प्रपद्ये, शरणं गतोऽस्मि अयं श्लोकः ब्रह्मपक्षेऽपि योज्यः तद्यथा यो ब्रह्मा कुभृतां भूभृतां पर्वतानां नागानां राज्ञां च सहस्रैः साध्र्दवार्द्धिनिमिषेण बबन्ध ससर्ज

धातूनामनेकार्थत्वात् क्षोणी [illegible] पुरी [illegible] स [illegible] तमजं

In Public domain. Digitization Muthulakshmi Research Academy

ब्रह्माणं शरणं प्रपद्ये, पुरा किल भगवान् ब्रह्मा प्रथममपः सुप्त्वा, ततो भूमिं भूमिभृतः पर्वतान्तागान्तादाश्च ससर्ज ।।

रोहिणीजनिरसौ बुधसूनुर्वारुणीश्रिततनुस्त्वनवद्यः।

वासुदेव इति यः प्रथितस्तं रेवतीप्रियतमं प्रतिपद्ये।। {97}

।।**रोहिणीति**।। रोहिण्याः सकाशाज्जनिरुत्पत्तिर्यस्य सोऽन्यत्र रोहिणी भार्या यस्य सः रोहिणीजनिः जायते यस्यां पुत्ररुपेणेति जनिर्भार्या जनी सीमन्तनीवध्वोरिति मेदिनी, बुधः आदिकविः कृष्णः सूनुरनुजो यस्य सोऽन्यत्र बुधः पुत्रो यस्य सः वारुणीं सुरां श्रितातनुर्यस्य सोऽप्यर्थे तु शब्दः वारुणीश्रिततनुरप्यनवद्यो निन्दानर्हः, अन्यत्र वारुणीं प्रतीचीं दिशं श्रिततनुः सकलङ्कोप्य़नवद्यः अनिन्द्यः योऽसौ वासुदेवो वसुदेवसुतः इति अन्यत्र वसुषु देवेषु भवो वासुदेव इति प्रथितस्तरेवतीप्रियतमं बलभद्रमन्यत्र चन्द्रमसं प्रपद्ये शरणं गतोऽस्मि

ध्रुवोधरस्तथा सोम आपश्चैवानिलोऽनलः

प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्तिताः ।।

इति विष्णुधर्मोत्तरे ।।

सुदामदौर्गत्यहरं तमोऽपहं

पूर्त्तेष्टदानैः पुरुषार्थदं नृणाम्।

पद्माढ्यपार्श्वं मकरादिरूपिणं

सिध्द्यै मुकुन्दं शरणं गतोऽस्म्यहम् {98}

In Public domain. Digitization Muthulakshmi Research Academy

।।सुदामेति।। सुदामनाम्नो ब्राह्मणस्य दौर्गत्यं दारिद्र्यं हरतीति तथोक्तस्तं अन्यत्र सुदामतुल्यं पाशसदृशं यद्दौर्गत्यं तच्च हरति तमोपहमविद्या निवर्तकम् अन्यत्र तमोगुणघ्नं पूर्तैर्वापीकूपादिभिरिष्टैर्यजनैर्दानैश्च नृणां पुरुषार्थदं धर्मार्थकाममोक्षदमित्युभयत्र तथा पद्मया रुक्मिण्या आढ्यः युक्तः पार्श्वो यस्य तम् अन्यत्र पद्मेन विधिना युक्तं पार्श्वमकरादि-मत्स्यकच्छपादिदशरूपधरम् अन्यत्र मकरकच्छपादि नवरूपधरं मुकुन्दं श्रीकृष्णमन्यत्र तन्नामानं निधिं च सर्वार्थसद्ध्यै शरणमहं गतोऽस्मि "महापद्मश्च पद्मश्च शङ्खो मकरकच्छपौ मुकुन्दकुन्दनीलाश्च वरश्च निधयो नवे"ति निधयः।।

लीनं प्रवर्त्तयति यो भुवि वेदशास्त्रं
विप्रेषु विष्णुयशसःप्रतिपन्नवर्ष्मा ।
दुष्कर्मकारिनिधनाय वृषप्रवृत्त्यै
तं नारदं कलिकृतं शरणं प्रपद्ये ।। {99}

।।लीनमिति।। विष्णुयशसस्तन्नाम्नो ब्राह्मणात्प्रतिपन्नं प्राप्तं वर्ष्म शरीरं येन सः कल्की विष्णुयशः पुत्रः कलिकालविलोपक इति पाद्मे अन्यत्र विष्णुरिति विष्णोरंश इति प्रतिपन्नं वर्ष्मप्रमाणं येन सः"वर्ष्मदेह प्रमाणयो" रित्यमरः प्रलीनं प्रनष्टं वेदशास्त्रं भुवि विप्रेषु प्रवर्त्तयति दुष्कर्मकारिणां निधनाय नाशाय वृषस्य धर्मस्य् प्रवृत्त्यै नारदं नारायणं समूहो नारं तच्च

In Public domain. Digitization Muthulakshmi Research Academy

द्यति नाशयतीति नारदस्तं कलिं कृन्तति छेदयतीति कलिकृत्कल्की तमत्र कलिकृतं कलहकारिणं नारदं मुनिं च शरणं प्रपद्ये ।।

एकान्द्विरूपान्त्रिचतुर्भिरीडिता–
न्पञ्चास्यषड्वक्त्रनुतांश्च सप्तभिः।
नाष्टाभिराप्यान्नवभिर्दशाच्युता–
न्व्रजामि नित्यं शरणं विमुक्तये ।। {100}

।।एकानिति।। एकानद्वितीयान् द्वौ प्रकृतिपुरुषौ रूपं येषां तान्द्विरूपान् त्रैगुण्यविषयाद्वेदस्य त्रिभिर्गुणैः कृत्वा चतुर्भिर्वेदैरीडितान् पञ्चप्राणा नस्यति निरस्यतीति पञ्चास्यो यमः ऊर्म्यादयो वा कामादयो वा यस्य षड्वक्तीति शड्वक् शरीरं तच्च त्रायतीति षड्वक्त्रो धर्मस्ताभ्यां शिवस्कन्दाभ्यामिति वा सप्तर्षिभिश्च नुतान् स्तुतान् अष्टभिर्वसुभिर्नवभिर्ग्रहैर्नाप्यानप्राप्यान् दशसंख्याकान् अत्त्युत्तान्मत्स्यादिरूपान् हरीन् कर्मभूतानहं विमुक्तये नित्यं शरणं व्रजामि। चतुर्विंशदवताराणामत्रैवान्तर्भावः मत्स्यः कूर्मो वराहः कपिलपृथुनराः। कृष्णबुद्धौ नृसिंहो रामो रामश्च रामस्तदनु च ऋषभो मोहिनी वैद्यराजः दत्तात्रेयः कुमारो द्विरविमिततनुर्वामनो व्यासयज्ञौ कल्की नारायणस्ते वितरतु कुशलं नारदस्तीर्थपादः द्विरविमिततनुश्चतुर्विंशति शरीरः तीर्थपादस्त्रिविक्रमः।।

पादे यस्य धुनी दिवः शिरसि वा देहे गले मेचकः
शय्या यस्य फणी च भूषणमहो मारः सुतो वा रिपुः।
भर्ता भूमिभृतां च यस्य निलयो यं षट्पुरारिं विदुर्यं
वाऽहुस्त्रिपुरारिमेमि शरणं तं च स्मऽथो माधवम् ।। {101}

In Public domain. Digitization Muthulakshmi Research Academy

।।पादेति।। दिवः स्वर्गस्य धुनी गङ्गा यस्य पादे शिरसि वा वर्तते मेचकः श्यामलो यस्य देहे गले कण्ठे चास्ति फणो नागो यस्य च शय्या अहो इत्याश्चर्यो भूषणं मारः स्मरः यस्य सुतो वा रिपुः भूमिभृतां मैनाकादीनां भर्त्ता संरक्षकः समुद्रो यस्य निलयः स्थानं भूमिभृतां भर्ता हिमालयः यस्य वा निलयः भिन्ने पदार्थे शब्दैक्यं द्रष्टव्यं यं षट्पुरारिं विदुः जानन्ति यं वा त्रिपुरारिमाहुः अथो इत्योदन्तो निपातः तं माघं वतु पुनरथो वो माधवं शिवं शरणमेमि प्राप्नोमि अर्थादुभयत्र प्रतीत्या सर्वेष्टसिध्दिः षट्पुरवासिनो दैत्याः श्रीकृष्णेन व्यापादिता इति हरिवंशादौ।।

पाण्ड्ये पण्डितमण्डिते मलयजाश्रीताम्रपर्णीजलैः
पूते नीवृतिसम्भवेन गुरुणा श्रीरामचन्द्रेण नः ।
इत्थं गूढपदं मतिप्रदमहो वाग्भूषणाख्यं कृतं
काव्यं व्याक्रियतेऽत्र येन विदुषा तं तं नमामो वयम् ।। {102}

।।पाण्ड्येति।। एतत्काव्यकर्तुः शिष्योक्तिरियं पण्डितमण्डिते पण्डितै - र्विद्वद्भिरलङ्कृते मलयजाः मलयपर्वतोद्भवायाः श्रीताम्रपर्ण्याजलैः पूते पवित्रिते पाण्ड्ये पाण्ड्यसंज्ञके नीवृतिदेशे सम्भवेन नोऽस्माकं गुरुणा श्रीरामचन्द्रेणेत्थं गूढानि पदानि यस्मिन्तत् गूढपदमतिप्रदं बुद्धिप्रदमदः इदं वाग्भूषणाख्यं काव्यं कृतम् । मत्काव्यं येन विदुषां पण्डितेनात्र व्याक्रियते व्याख्यानं क्रियते तं विद्वांसं वयं नमामः। तस्य दासा भवामः काव्यस्य वाग्भूषणसंज्ञकस्य गूढाक्षरस्य स्वकृतस्यास्य चित्रां व्याख्यां प्रचक्रे शतकस्य सूरिर्विद्वन्मुदे भार्गवरामचन्द्रः ।।

श्री रामचन्द्रकृता वाग्भूषणव्याख्या समाप्ता

In Public domain. Digitization Muthulakshmi Research Academy

विशिष्टपदव्युत्पत्तिसूची

शब्दः व्युत्पत्तिः	श्लोकसंख्या
अकायः–अग्निः –कायं शरीरं प्रदहतीति	32
अकराः –राक्षसाः–अकं दुःखं रांति ददतीति	26
अलकालकाः–यक्षाः–अलकायामलन्तिपर्यटन्तीति	26
अलीकदृक्–शिवः– अलीके ललाटे दृक् यस्य सः	14
आपवः–वशिष्ठः–	10
आवनेयः– भौमः –अवनेः पुत्रः	4
इलाशयः –नागः –इलायां भूमौ शेते इति	37
ऐनिः– शनैश्चरः– इनस्यापत्यं पुमान्	8
कमलवाहनः– वायुः– कमलः कुरङ्गः वाहनं यस्य सः	60
कामलाः– जलंधरादयः –कमले जले भवाः	60
कुचुमध्यमुखः–गजमुखः– कवर्गचवर्गयोर्मध्यस्य मुखं यस्य सः	1
गवीश्वराः – दिक्पालाः–गवां दिशां ईश्वराः	2
गवेन्द्रः– शक्रः –गोः स्वर्गस्य इन्द्रः	2
गोजनिः–सूर्यः– गवां धेनूनां जनिरुद्भवो यस्मादिति	2
गोपतिः–ब्रह्मा– गोः वाण्याः पतिः	2
गोपत्रः– कृष्णः– गोपान् त्रायत इति	2
गोपत्रः– शिवः– गौः पत्रं वाहनं यस्य सः	2
त्रिवेदी - वेदत्रयी त्रिवलिर्यस्याः सा -	24

In Public domain. Digitization Muthulakshmi Research Academy

दुर्बेरः–कुबेरः– दुष्टं बेरं शरीरं यस्य सः 16

द्व्युपसर्गाः–विप्राः– द्वावुपसर्गौ येषां ते 19

धात्रंशभूतः–धाता अंशभतो यस्य सः 20

न रमेत इति –अरमा– 25

नास्ति समा सादृश्यं यस्याः सा –असमा– 25

पत्रवाहनः – स्कन्दः – पत्रं वाहनं यस्य सः 1

पुरं शरीरं संश्रयः स्थानं यस्य सः–कुबेरः 33

लाकृतिः– चन्द्राकृतिः– लस्य चन्द्रस्येवाकृतिर्यस्य सः 20

वासुदेवः –वसुषु देवेषु भवः–चन्द्रमसः 97

विक्कः– गजः– विंशतिवत्सरवयस्कः 9

वित्तरः–कुबेरः –वित्तं धनं राति ददातीति 33

सुनुसूनुः–कश्यपः– सूनुः सूर्यः ससूनुर्यस्य सः 73

सूनास्त्रः– कामः– सूनानि पुष्पाण्यस्त्राणि यस्य सः 3

सोमः–परमेश्वरः– उमया सह वर्तत इति 21

स्तुतचित्रकर्मा– स्तुतं चित्रितं कर्म यस्य सः 13

स्वगोदः–सूर्यः– स्वगां दृष्टिं ददातीति 2

In Public domain. Digitization Muthulakshmi Research Academy

पदसूची

अ

अकराः– राक्षसाः–26

अग्र्यवर्णी–ब्रह्मचारी–14

अब्ध्यात्मजा–लक्ष्मीः36

अम्बरमणिः– सूर्यः25

अवनिसुरः–ब्राह्मणः–15

अष्टापदाक्षः–हिरण्याक्षः13

अहस्ताः– नागाः–26

आपवः–वसिष्टः11

आवनेयः–भौमः 4

इ

इलाशयः–नागः37

ए

ऐनिः–शनैश्चरः–8

ऐलः – राजा –5

क

कमलः–हरिणः14

कौशं–कमण्डलुः–14

कमलपतिः–विष्णुः60

कमलबन्धुः –सूर्यः60

कमलभूः–ब्रह्मा 60

कविः–शुक्रः–7

काकोदरः–कालीयनागः–1

कीशः– वानरः93

कुचुमध्यमुखः–गजमुखः–1

कुम्भोद्भवः–अगस्त्यः57

ख

खचरः–ग्रहः 11

खमणिः –सूर्यः20

In Public domain. Digitization Muthulakshmi Research Academy

ग

गवीश्वराः – दिक्पालाः–2

गवेन्द्रः –शक्रः–2

गोः वाणी–2

गोजनिः–सूर्यः–2

गोपतिः–ब्रह्मा–2

गोपत्रः–कृष्णः–2

गोपत्रः–शिवः–2

गौः– क्रतुः–2

गौः –दिक्–2

गौः –धेनुः–2

गौः–जलम्–2

गौः–स्वर्गः–2

गौ– सूर्यः–2

घ

घटश्रुतिः–कुम्भकर्णः–13

च

चेतोजः- कामः22

त

तातः–पिता1

तातः–पुत्रः–1

द

दुर्बेरः–कुबेरः–16

दृक्कर्णः– सर्पः–28

द्युसदः– देवाः–5

द्व्युपसर्गाः–विप्राः–ब्राह्मणाः

ध

धूमध्वजः–अग्निः–16

न

नयनपादः– गौतमः–82

In Public domain. Digitization Muthulakshmi Research Academy

प

पङ्क्तिस्यन्दनः–दशरथः22
पज्जं–पादजातं–14
पञ्चजनः–मनुष्यः–13
पञ्चास्यः– यमः100
पञ्चास्यः –सिंहः93
पवनात्मा –हनूमान्18
पाठीनमूर्तिः– मत्स्यमूर्तिः10
पुरन्ध्रिः–वनिता–65
पौलस्त्यः– रावणः–8
प्रथमसृष्टिशयः –जलशायी(हरिः)83

ब

बाहुजाः–क्षत्रियाः15
बिडौजाः –शक्रः56

भ

भूदारः– वराहः21
भूमिनन्दनः– मङ्गलः27

म

मनसिजः– कामः–63

य

यमौ –युग्मज़ातौ

व

वाडवाः– ब्राह्मणाः–63
विक्क–गजः9(विंशतिवत्सरः)
विधुः–चन्द्रः–9
विधुः–ब्रह्मा–9
विधुः–विष्णुः–9
विप्राधिपः–चन्द्रः1
वेदाम्बा– वेदमाता –गायित्री35

श

श्राध्ददेवः– यमः29
श्राध्दामरः –यमः30
श्रुत्यक्का–वेदमाता

In Public domain. Digitization Muthulakshmi Research Academy

स

सदनं –गृहं–5
समीरसूनुः–वायुपुत्रः–40
सलिलं –कमलं 11
सलिलं –जलम्11
साक्षरः– पण्डितः 29
सूनानि–पुष्पाणि–3
सूनास्त्रः कामः 3
सूर्यात्मजः–सुग्रीवः–18
सौम्यः– बुधः–5
स्तम्बेरमः–गजः 7
स्तम्बेरमासुरः –गजासुरः–7

ह

हरिः–इन्द्रः18
हरिः–सूरू–18

In Public domain. Digitization Muthulakshmi Research Academy

भवतांमुदंहर्षंददतां॥६४॥देहेति॥ देहेशरीरेलग्नासततंसुधाऽमृतप्राया दृशोश्चांद्रशलाकिकाकर्पूरशलाकिकामिथोरहसिसखी प्रतिप्रमोतीत्ययोगृ हंतस्मिन्नुअयेशुभकर्मणिइतिवामंत्रप्रदारतौसंभोगेप्रियासुतैःपुत्रैःकृत्वास्वर्गापवर्गौप्रदादेवैरर्यमादिभिःप्रदत्ताभगोअर्यमासावितापूरंधिर्मह्यंत्वादुर्गा ईयन्यायदेवाइतिश्रुतेः वनितापुरंध्रिर्वोयुष्माकंमुदंहर्षमातनोतु विस्तारयतु॥ ६५ ॥ दिगंबरइतिउभयत्रसप्तविशेषणानि ॥ ६६ ॥ इतिकामः

इतिपंचभिश्श्लोकैःकुलकमुक्तं।। देहेसुधाचांद्रशलाकिकादृशोर्मिथःसखीमंत्रिरयेरतौप्रिया।। स्वर्गापवर्गौवनिता सुतैःप्रदादेवैःप्रदत्तामुदमातनोतुवः ।। ६५ ।। दिगंबरःपांसुविधूसरांगोजटाधरोवीतभयोविलज्जः ।। लीला रुचिर्मातृगणैःपरीतोमुदंतनोत्वीशइवार्भकोवः ।। ६६ ।। तेधन्यास्तर्कशास्त्राभ्यसनपरिरताव्याकृतौयेचदक्षा मीमांसावेदिनोयेश्रुतिनिवहभृतोविश्वमेतद्दधंते ।। काव्यालंकारविज्ञारसरुचिरपदैर्दुःखितान्हर्षयंतिसांख्याःप्राभा करात्याभुविनरमिपतोदेवतांस्तान्नमामः ।। ६७ ।। व्यर्थंनैयायकास्तेघटपटमठतांशाब्दिकाठगठजेयंतद्वन्मी मांसकायेजगदिदमहरंकर्मजन्यंवदंति।।

तृतीयपुरुषार्थइतिभावः ॥ तइति ॥ येतर्कशास्त्राभ्यसनेपरिरतास्तेधन्याः व्याकृतौव्याकरणेयेदक्षानिपुणास्तेचधन्याः श्रुतिनिवहभृतेविदस मूहधराःयेमीमांसाविदिनः मीमांसाशास्त्रज्ञास्तेएतद्विश्वंदधंतेकाव्यालंकारविज्ञाःरसैः शृंगारादिभिःरुचिरैर्मनोज्ञैः पदैः वाक्यैः दुःखितान्हर्षयंति सांख्याःसांख्यशास्त्रज्ञाःप्राभाकराद्याःभुविभूमौनरामित्तोमनुष्यव्याजात्देवतान्सर्वान्त्वयंनमामः॥६७॥व्यर्थमिति॥नैयायकाःघटत्वंपटतांमठतामे

In Public domain. Digitization Muthulakshmi Research Academy

वंव्यर्थवदंति शाब्दिकाःवैयाकरणाः ढकृस्यान्नूठनूस्यात् एयादेशःस्यादित्येवंवदंति तद्वद्येमीमांसकास्तेजगदिदमहरंनास्तिहरेोयास्मिंनूतदहरमनी
श्वरंकिंतुकर्मजन्यंवदंति · वेदांतिनस्तुजगनूशून्यंवदंति अइहेतिखेदे अन्येप्राभाकरवैशेषिकाद्याः अनाभिज्ञाः वृथावादिनोभवंति वयंतुसर्वशास्त्र

शून्यंवेदांतिनस्तेजगदहहवृथावादिनोन्येऽनभिज्ञाःशास्त्राण्यालोड्यसर्वंवयमिहपुणारामनामस्मरामः ॥ ६८ ॥
दुर्भाग्यैःकविभिर्मृगीदृगधरश्रोणीकुचाक्षिभ्रुवंभूपानांतुदुरात्मनांकुचरितंप्रोद्वर्ण्यतेगौरवात् ॥ अस्माभिस्तुमुनींद्रगौत
मवधूशापप्रमोचावहंश्रीरामस्यपरात्मनोमुनिवृतंपादाब्जंवर्ण्यते ॥ ६९ ॥ अल्पाहहाधररसंकफपित्तयुक्तमेणीदृशा
ममृतशंसिधियःपिबंति ॥ मोक्षेनिबद्धमनसःकमलाक्षशेषमेतेवयंहरिपदाब्जरसंपिबामः ॥ ७० ॥ कुचांते
रेकुंकुमभूषणाढ्येमृगीदृशांशेरतएवमंदाः॥भागीरथीरोधसिसन्निविष्टाःश्रीरामरामेतिवयंवदामः ॥ ७१ दग्धस्य
कुक्षेर्भरणाययत्वालिशानमंतिमूढान्हतचेतसःखलान् ॥ अमीतुसंतोषमुवृत्तयोवयंप्रभुंनमामोऽच्युतयेऽच्युतंसदा ॥ ७२

ण्यालोड्येहशास्त्रेपुनिपुणाः रामनामस्मरामः ॥ ६८ ॥दुर्भाग्यैरिति ॥ कुचाक्षिभ्रुवंअचतुरस्त्रेत्यादिना अजंतोनिपातः प्राण्यंगत्वादेकवद्भावः गौ
रवाद्रौरवमाश्रित्य शापप्रमोचमावहतिप्रापयतीति स्पष्टमन्यत्॥ ६९ ॥ अल्पाइति ॥ अहहेतिखेदे अमृतमितिशंसिधीर्येषांते ॥७०॥कुचांतरे
इतिस्पष्टार्थः ॥ ७१ ॥ दग्धस्येति ॥ शिशावज्ञेचबालिशइत्यमरः अच्युतयेअपुनर्निवर्तनायप्रभुंनमामइत्युक्तंतदेवाहदग्धस्येति॥ ७२ ॥

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

ISBN-978-93-80171-30-2

संस्कृत अकाडमी
(आदर्शशोधसंस्था)
उस्मानियाविश्वविद्यालयः हैदराबाद् - 500 007
दूरवाणी -040-27070281